## ॥ द्वितीयः स्तबकः प्रारभ्यते ॥

**श्रीहरिः॥ ग० ॥ अथ कदाचिदौत्थानिकेऽपि शु
भे कर्मणि मां निद्रितं सा द्रुतं दृष्ट्वाऽपि तस्मि
न् प्रवृत्तेति विचार्यैव विप्रियेण तेन विलोचन
योर्वारिप्रवाहं विसृजतस्तस्य समागतव्रजवरव
निताविनयविह्वला व्रजराजवधू रोदनरवं नाऽ
शृणोत्॥ १ ॥**

श्रीकृष्णायनमः ॥ अथ शकटासुरभंजनलीलामुपक्रमते ॥ अथे
ति॥अथ पूतनावधानंतरं कदाचित् व्रजराजवधूर्यशोदा तस्यश्री
कृष्णस्य रोदनरवं नाऽशृणोत् नशृणोति स्म ॥ श्रवणाभावे हेतुगर्भं
यशोदाविशेषणमाह॥ समागतेति॥अत्राप्यौत्थानिके शुभे कर्मणी
ति योज्यं ॥ औत्थानिकशुभकर्मनिमित्तं समागतासु व्रजवरवनि
तासु यो विनयः सत्कारादिकरणं तेन विह्वला व्याकुला ॥ की
दृशस्यतस्य ॥ विलोचनयोरिति॥विलोचनयोः संबंधिनं वारिप्रवा
हं विसृजतः ॥ लोचनवारिप्रवाहविसर्जने हेतुमुत्प्रेक्षते ॥ मामि
त्यादि ॥ सा यशोदा मां निद्रितं दृष्ट्वाऽपि औत्थानिके उत्थानं
शिशोरंगपरिवर्तनं तत्र भवमौत्थानिकं तस्मिन् शुभेऽपि कर्मणि द्रु
तं प्रवृत्ता ॥ द्रुतमित्यनेन विचारराहित्यं सूचितं ॥ इति विचार्य
विप्रियेण अप्रियेण तेनेव प्रवर्तनेनेवेत्युत्प्रेक्षा ॥ अथच शकटाऽ





सुरवधोपक्रमोपयोगित्वात् विशेषेण प्रियेण ॥ एवंचाऽत्राऽश्रुमो
चनमानंदतो बोध्यं ॥ अयं भावः ॥ श्रीभगवदुत्थानानंतरमखिल
शुभकर्मारंभोभवति न शयनानंतरमिति भगवदाज्ञारूपधर्मशास्त्र
मर्यादा इयं तु भगवच्छयनानंतरमपि शुभकर्मणि प्रवृत्तेति स्वाऽऽ
ज्ञाविरुद्धत्वादप्रियत्वं तत्प्रवृत्ते रिति॥ १ ॥

**प० ॥ युग्मं॥ लब्ध्वा छिद्र मनिद्र एष दनुजो दु
ष्टः प्रविष्टोह्यनः शिष्टाऽनिष्टकरः कनिष्ठवयसा
जुष्टं विलोक्य प्रभुं॥ धृष्टं क्लिष्टसुखप्रदः कुजभर
त्वष्टा वरिष्ठेतरं कंसादिष्टममुं तथाविधमहो दृष्ट्वा
तदाऽन्यद्भुतम्॥ १ ॥
वृषरक्षणकर्ताहं सद्धर्ता ह्येकचक्रधर्तेति॥ मत्वा
कृष्णः शकटं विपरीतं प्राक्षिपत्सचक्रं तम्॥ २ ॥**

अथ शकटभंजनमुत्प्रेक्षापूर्वकं वर्णयति ॥ लब्ध्वेत्यादियुग्मेन ॥
अनिद्रः अवकाशलब्ध्यै जागरूकः दुष्टः अतएव शिष्टाऽनिष्टक
र एष दनुजः प्रभुमपि कनिष्ठवयसा अल्पवयसा बाल्येनेतियाव
त् जुष्टं युक्तं विलोक्य छिद्रं यशोदादीनां कार्यांतरव्यापृतिरूपम
वकाशं लब्ध्वा अनः क्लीबे नः शकटोऽस्त्रियामित्यमरात् शकटं
प्रविष्टोऽभूदिति शेषः ॥ एतदसुरप्रवेशनं च श्रीमद्वल्लभाचार्यचर
णैः सुबोधिन्यां सोपपत्तिकं वर्णितं ॥ तदा कृष्णः पादेनेति शेषः॥
तमसुराऽऽविष्टं सचक्रं शकटं द्रुतं शीघ्रं विपरीतं प्राक्षिपत् ॥ की
दृशःकृष्णः॥ क्लिष्टेति ॥ क्लिष्टानां प्राप्तक्लेशानां भक्तानां सुखप्रदः॥
तथा ॥ कुजेति ॥ कौ पृथिव्यां जातो यो भरोभारस्तस्य त्वष्टा त

क्षकः नाशकइतियावत् ॥ लौकिकतक्षकोऽपि कुजानां वृक्षाणां भरं नाशयत्येव ॥ किंकृत्वा॥ धृष्टं प्रभोरपि हनने उद्यतत्वात् कंसादिष्टं कंसेनाऽऽज्ञप्तं वरिष्ठेतरं अधमं अमुमसुरं तथाविधं भाररूपं दृष्ट्वा ॥ अहो आश्चर्यं ॥ अहं ॥ वृषेति ॥ वृषस्य धर्मस्य श्लेषेण वृषभस्य रक्षणकर्त्ता सद्वर्ता साधुरक्षिता ॥ एकेति॥एकोऽद्वितीयः स चाऽसौ चक्रधर्तेति तथाविधः यद्वा एकस्य चक्रस्य धर्ता हि प्रसिद्धं ॥ इति अन्यदपि मत्वा निश्चित्य ॥ वृषरक्षणकर्तुरेकचक्रधरस्य साधुरक्षकस्य ममोपरि वृषपीडकश्चक्रद्वयधरस्साधुपीडकश्चायं किमर्थमिति विचार्य तद्भंगमेव कृतवानिति भावः ॥ आद्ये शार्दूलविक्रीडितं द्वितीये गीतिरार्या वृत्तं ॥ १ ॥ २ ॥

**रसास्तदा ते रसरूपमग्रतो ह्यधःशयानं नितरां निरीक्ष्य तं॥ स्वयं तथा द्राक् प्रबभूवुरादृता विचार्य नूनं शकटस्थिताः किमु॥ ३॥**

शकटभंजने तद्गतदध्यादिभाजनस्थिता रसा अधः पतितास्तत्रोत्प्रेक्षते ॥ रसाइति ॥ तदा शकटस्थितास्ते रसाः दुग्धादयोऽग्रतः स्वसमक्षमित्यर्थः ॥ रसरूपं रसोवै स इति श्रुतिप्रतिपाद्यपूर्णरसात्मकं तं श्रीकृष्णं अधः शयानं शकटाधोनिद्रितं नितरां निरीक्ष्य आदृताः सादराः संतः स्वयमपि विचार्य अपरिच्छिन्नरसरूपस्य श्रीभगवतः शकटाधः स्थितिस्तद्भोग्यानां परिच्छिन्नानामपूर्णानामस्माकं तदुपरि स्थितिरयोग्येत्येवं विचारं कृत्वा किमु द्राक् शीघ्रं नूनं निश्चयेन तथा अधः स्थिताः प्रबभूवुः ॥ हि युक्तमिदं ॥ वंशस्थं वृत्तं ॥ जतौ तु वंशस्थमुदीरितं जराविति वृत्तरत्नाकरे तल्लक्षणात् ॥ ३ ॥



**अनसो मनसा पातं संशयानास्तदा द्रुतं ॥ वचसा कथनाशक्ता व्रजेशाद्यास्समाययुः॥ ४॥**

अनसइति ॥ तदा शकटपतनवेलायां व्रजेशाद्या नंदाद्या गोपाः अनसः शकटस्य पातं पतनं प्रति मनसा संशयानाः आकस्मिकमिदं शकटपतनं निर्निमित्तं कथं जातमिति संशयं कुर्वंतः अतएव वचसा कथनाशक्ताः वाचा कथनं कर्तुमसमर्थाः संतो द्रुतं शीघ्रं समाययुः तत्रेति शेषः ॥ ४ ॥

**किंच॥ विकटाच्छकटात्प्राप्तसंकटं निकटं ययौ ॥ नंदनं नंदपत्नी सा ग्रहीतुं ग्रहणातुरा ॥ ५ ॥**

विकटादिति॥किंच सा नंदपत्नी यशोदा ग्रहणातुरा सती पुत्रग्रहणे सोत्कंठा व्याकुला वा सती" विकटात् करालात् महतोवा विकटा वज्रवाराह्यां त्रिषूरुविकरालयो रिति मेदिनीकोशात् एवंविधात् शकटात्प्राप्तसंकटं नंदनं ग्रहीतुं निकटं शकटसमीपं पुत्रसमीपं वा ययौ ॥ ५ ॥

**ग०॥ तदनु सा मनुजविग्रहं बाल्यादिव दनुजदर्शनाद्रससरणं रसायां च समीक्ष्य प्ररुदंतं सुतं तं रसरूपं शयाभ्यां द्वाभ्यां गृहीत्वा संश्लिष्य गृहमनयत्॥ २॥**

तदन्विति॥ तदनु आगमनानंतरं सा यशोदा रसरूपमपि मनुजविग्रहं प्ररुदंतं तं सुतं श्रीकृष्णं द्वाभ्यां शयाभ्यां हस्ताभ्यां गृहीत्वा संश्लिष्य गाढमालिंग्य गृहमनयत् नीतवती ॥ रोदने हेतुमुत्प्रेक्षते॥

बाल्याद्धेतोर्दनुजदर्शनादिव दैत्यदर्शनादिव ॥ बाला हि भयंकराकृतिदर्शनेन रुदंति ॥ हेत्वंतरमुत्प्रेक्षते ॥ रसेति ॥ रसायां भूम्यां भूर्भूमिरचला ऽनंता रसेत्यमरात् रससरणं दुग्धादिरसप्रवाहं समीक्ष्य च ॥रसरूपायां तस्यां रससंमेलने पुनस्तल्लाभो न स्यादित्यभिप्रायेणेत्यर्थः ॥ २ ॥

**प०यन्नाम गृण्हंति पुराविदस्तु कर्मप्रपूर्त्यै जगति प्रसिद्धं ॥ तादृक्षसूनोः समकारयद्वै क्षेमाय सा स्वस्त्ययनादिकृत्यं॥ ६॥**

अथ यन्नाम पुरातनैर्ज्ञानिभिरखिलकर्मपूर्त्युद्देशेन गृह्यते तथाविधस्य परममंगलरूपस्य क्षेमार्थं ब्राह्मणैः स्वस्तिवाचनादिकं कारितवतीत्याश्चर्यपूर्वकं वर्णयति ॥ यदिति ॥ ब्राह्मणैरिति शेषः ॥ ब्राह्मणैः स्वस्त्ययनादिकृत्यमकारयत् ॥ शेषं स्फुटं ॥ इंद्रवज्रा वृत्तं ॥ ॥ ६ ॥

**वत्सलतया ऽथ वत्सं स्वोत्संगे न्यस्य लालयंती सा॥ गरिमाणमस्य वोढुं नो सेहे रत्नभूधरस्येव ॥७॥**

अथ तृणावर्त्तवधलीलां प्रस्तोतुं प्रथमतो भगवताऽंगीक्रियमाणे गुरुत्वे यशोदा तद्भारं सोढुं नाशक्नोदित्याह ॥ वत्सलतयेति ॥ अथ शकटभंजनलीलानंतरं ॥ स्फुटं ॥ रत्नभूधरस्येवमेरोरिव ॥ अरम्यत्वनिवृत्तये रत्नेति ॥ भगवद्विग्रहसादृश्यादिंद्रनीलाख्यरत्नपर्वतस्येवेत्यभूतोपमा वा ॥ ७ ॥



**ग० ॥ तदा यशोदा महेंद्रनीलोपलोपलक्षिते निर्मले निजालयेलातले तेन तत्साम्यं रम्यं समीक्षितुमिव तत्क्षणं तत्र सन्निधाय विधुवदना कर्मसु प्रववृते ॥ ३ ॥**

तदेति॥विधुवदना शशिमुखी ॥ लौकिकगीतादिषु गीयमानो विधुर्विष्णुर्वदने यस्या इति वा ॥ एवंविधा यशोदा तदा तस्मिन्समये ॥ तं श्रीकृष्णं ॥ महेंद्रेति ॥ महांतो विशाला ये इंद्रनीलोपलास्तैरुपलक्षिते युक्ते इत्यर्थः ॥ निर्मले ॥ निजेति ॥ निजः स्वीयो य आलयो गृहं तत्संबंधिनी या इला भूस्तस्यास्तले निधाय तत्क्षणं तस्मिन् क्षणे तत्र गृहे कर्मसु प्रववृते ॥ निधाने फलमुत्प्रेक्षते॥रम्यं रसिकजनानंदकारि॥तेनेति॥ तेन उक्तपृथ्वीतलेन तत्साम्यंचाकचक्यस्निग्धत्वश्यामलत्वादिना भगवद्विग्रहसाम्यं समीक्षितुमिव ॥ २ ॥

**तदंतरे किल॥प०॥ नरादराजेन नियोजितस्तं नरादनीचस्तृणपूर्वशब्दः ॥ आवर्तसंज्ञस्समगादथा ऽर्धे सोऽन्वर्थयन्नाम विचारयन्स्वम् ॥ ८ ॥**

तदंतरे इति ॥ तस्मिन्नवकाशे ॥ नरादेति ॥ नरादराजेन कंसेन नियोजितः ॥ तृणेति ॥ तृणेत्येवंरूपः पूर्वशब्दः स्वनामपूर्वावयवः शब्दो यस्य तथाविधः आवर्त इति संज्ञा यस्यैवंविधः तृणावर्ताभिधइति यावत् नरादनीचः नरादेषु नीचोदैत्याधमः ॥ नीचश्चासौ नरादश्चेति वा विग्रहः ॥ कुत्सितानि कुत्सनैरिति समासः ॥ अर्धे

स्वं नाम आवर्त्त इत्येवंरूपं अन्वर्थयन् ॥ नचार्ध एकारोऽर्ध ओ कार इति महाभाष्यप्रयोगे इवात्रापि अर्ध नामेति सामानाधिक रण्यं ॥ आवर्त्तते भ्राम्यतीति आवर्त्त इत्यर्थविशिष्टं कुर्वन् ॥ अने कविधानावर्तान् जनयन्नित्यर्थः ॥ अथच वक्ष्यमाणप्रकारेण वि चारयन् सन् तं श्रीकृष्णमगात् ॥ उपजातिर्वृत्तं ॥ ८ ॥

**नामैकदेशस्य हि भक्षकै मे तद्रक्षकैश्चाऽऽकुलमे तदस्ति॥मया प्रणाश्यं तटदेशसंस्थमावर्तगर्ता चितसूर्यजायाः॥ ९ ॥**

विचारमेवाह ॥ नामेत्यादि ॥ हि यस्मादेतद्गोकुलं मे नामैकदेशस्य तृणस्य भक्षकैर्गवादिभिः तु पुनः तद्रक्षकैः तेषां गवादीनां रक्षकै र्गोपैः आकुलं व्याप्तं ॥ आवर्तेति ॥ आवर्तानामंभोभ्रमाणां ये ग र्तास्तैरंचिता युक्ता या सूर्यजा यमुना तस्यास्तटदेशसंस्थं चास्ति अतो मया प्रणाश्यं प्रकर्षेण नाशनीयमिति ॥ मन्नामोत्तरार्धधार कयमुनातटस्थं तथा मन्नामपूर्वार्द्धभक्षकैस्तद्रक्षकैश्च युक्तमित्यव श्यमेव मया नाशनीयमिति विचार्येत्यर्थः ॥ उपजातिर्वृत्तं ॥ ९ ॥

**ग० ॥ ततः परितः प्रलयसामयिकेष्विव प्रबलत रपरागपटलशर्कराश्मपरिपूरितप्रचंडपवनेषु खर रश्मिखररश्मिप्रकरबहलवेश्मगोकुलजननयन कुड्मलकुलान्याच्छादयत्सु सत्सु॥ ४ ॥**

ततइति ॥ आगमनानंतरं परितः सर्वतः ॥ प्रलयेति ॥ प्रलयकाली नेष्विव ॥ प्रबलेति ॥ प्रबलतरा दुर्निवारा अतिशयिता इति याव



त् ॥ एवंविधाः परागपटलं धूलिवृंदं शर्कराश्मानः सिकतोपलाश्च तैः परितः सर्वतः पूरिताश्चातएव प्रकर्षेण चंडाः क्रूरा ये पवना वा यवस्तेषु ॥ खरेति ॥ खरास्तीक्ष्णा रश्मयो यस्य स खररश्मिः सू र्यस्तस्य खराः क्रूरा ये रश्मयः किरणास्तेषां प्रकरः समूहः बहला नि यानि वेश्मानि गृहाणि गोकुलजननयनकुड्मलकुलानि सचता निचतानिचेतिद्वंद्वः ॥ कर्मभूतान्येतानि आच्छादयत्सु सत्सु अस्यो त्तरत्रान्वयः ॥ ४ ॥

**प० तृणतुल्यस्तृणावर्तस्तृणादांस्त्रासमावहन्॥तत्रा तूंश्च त्रिलोकेशं गृहीत्वा गगनं गतः॥ १० ॥**

तृणेति ॥ तृणतुल्यस्तृणसदृशोऽतिक्षुद्र इतियावत् ॥ एवंविधस्तृणा वर्तस्तृणादान् गवादीन् तत्रातॄन् गोरक्षकान् गोपांश्च त्रासं भयं आ वहन् कुर्वन् सन् त्रिलोकेशं भगवंतं गृहीत्वा गगनं गतः ॥ स्वयं तृ णतुल्योऽतिक्षुद्रोऽपि तृणादानां तद्रक्षकाणां च भयं जनयतिस्मेति त्रिलोकेशं विश्वंभरमपि गृहीत्वा गगनं गत इति च चित्रमत्र ध्वनि तं ॥ वहतेर्द्विकर्मकत्वं ॥ १० ॥

**अहह सुतमदृष्ट्वा तत्र तं सा यशोदा शिथिलि तसकलांगा संपपात क्षितौ द्राक् ॥ नयनकमल बाष्पव्याजतो हृत्स्थितस्य सलिलमथ वहंती दुः खिता शोकवार्द्धेः॥ ११ ॥**

अहहेति ॥ अथ तत्र पूर्वोक्तप्रदेशे तं सुतं श्रीकृष्णं अदृष्ट्वा दुःखि ता अतएव शिथिलितसकलांगा ॥ अथच ॥ नयनेति ॥ नेत्रकम लसंबंधिबाष्पमिषेण हृत्स्थितस्य शोकवार्द्धेः शोकसमुद्रस्य सलि

लं वहंती सा यशोदा क्षितौ द्राक् संपपात ॥ अहहेति खेदे ॥ मालिनी वृत्तं ॥ ११ ॥

**ग० ॥ ततस्तत्समशोकवाराशिविवशीभूतांतःकरणव्रजवधूजनविलोचनवारिप्रवाहैरिव तदुद्धूतधूलिधोरणीषु शांतासु॥ ५॥**

ततइति ॥ ततः भगवदूर्ध्वनयनानंतरं ॥ तदुद्धूतेति ॥ तेन खरतरवायुना करणभूतेन उद्धूता उच्छलिता धूलिधोरण्यो धूलिपंक्तयस्तासु शांतासु सतीषु ॥ तच्छांतौ साधनमुत्प्रेक्षते ॥ तत्समेति ॥ तया यशोदया समस्तुल्यो यः शोकजलधिपराधीनांतःकरणो व्रजवधूजन इत्यादि स्फुटं ॥ तेन यशोदाशोकाब्धिना तुल्यो यः शोकवाराशिरिति वा ॥ ५ ॥

**प० ॥ तृणस्तन्मुखतापेन तप्तः सन्निव तत्क्षणम् ॥ आपतच्छीतलं मत्वा शिलापृष्ठे महाजवात्॥ १२॥**

भगवद्भारासहिष्णोस्तृणावर्तस्य भूमिपतनमुत्प्रेक्षापूर्वकमाह ॥ तृणइति ॥ सत्या भामेतिवत् तृणस्तृणावर्तः ॥ अतएव ॥ तदिति ॥ तस्य भगवतो मुखतापेन मुखस्याग्न्यधिष्ठानत्वात् तप्तः सन् इव तत्क्षणं तस्मिन्नेव क्षणे ॥ इदमिति शेषः ॥ शिलापृष्ठमित्यर्थः ॥ शीतलं मत्वेव महाजवात् अतिवेगात् शिलापृष्ठे आपतत् ॥ १२ ॥

**वज्रायुधवज्राहतमद्रिमिवोच्चं विलोक्य तं दैत्यं॥ तदुरःस्थलाद्गृहीत्वा कृष्णं गोपी समानयद्देहं॥१३**





वज्रेति ॥ योजना स्फुटा ॥वज्रायुध इंद्रस्तस्य वज्रेणाहतं ताडितं अद्रिमिव उच्चं ॥ तस्य तृणावर्तस्य उरःस्थलात् हृदयात् ॥ गोपी यशोदा ॥ १३ ॥

**निर्धनो हि धनं लब्ध्वा गतासूनिव देहभृत् ॥ तथा नंदयशोदाद्यास्तं प्राप्याऽऽपुर्मुदं तदा॥ १४॥**

यथा निर्धनस्य धनलाभेन यथाच गतानां स्वीयानां प्राणानां पुनर्लाभेन मनुष्याणामानंदो भवति तथा नंदयशोदादीनामसुरनीतकृष्णलाभेनानंदोभूदित्याह ॥ निर्धनइति ॥ स्पष्टं ॥ गतासूनिति कर्मधारयः॥ एतेन कृष्णस्य प्राणतुल्यत्वं यशोदादीनां देहतुल्यत्वं च बोधितं ॥ १४ ॥

**कदाचिच्च ॥शून्यं वदंति ये मां वै ते तु मिथ्याभिशंसिनः ॥इति विश्वासदार्ढ्याय विश्वास्यः किं बभूव सः॥ १५॥**

अथ कदाचित् यशोदा स्वांकस्थं कृष्णं लालयंती सती तन्मुखे विश्वमपश्यत्तदेवोत्प्रेक्षापूर्वकं वर्णयति ॥ कदाचिच्चेति ॥ शून्यमिति ॥ ये माध्यमिकाः मां शून्यं वदंति ते मिथ्याभिशंसिनः असत्यवक्तार इत्यस्मिन् विषये विश्वासदार्ढ्याय किमित्युत्प्रेक्षा॥ सःश्रीकृष्णः विश्वास्यः विश्वं आस्ये यस्य स विश्वास्यः ॥ श्लेषेण विश्वास्यः विश्वसनीयः बभूव ॥ मन्मुखे विश्वं दृष्ट्वा शून्यवादिनां वचो मिथ्या मंतव्यमिति भावः ॥ १५ ॥

**गर्गज्ञापितचरितः परितः पुष्णन् सुखं व्रजे मुष्ण**

**न्॥ तापं सर्वजनानां कृष्णः क्रीडत्यहो बलेन स मम्॥ १६॥**

अथ गर्गकृतस्य चरित्रबोधनपूर्वकनामकरणादिसंस्कारस्य बोधनपूर्वकं व्रजक्रीडनमाह॥गर्गेति ॥ सर्वजनानां तापं मुष्णन् परितः सर्वतः सुखं पुष्णन् कृष्णः बलेन बलरामेण समं सह व्रजे क्रीडतीति संबंधः ॥ गर्गज्ञापितचरित इत्यनेन नंदप्रार्थनया गर्गकृतनामकरणादिवृत्तं बोधितं ॥ कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ॥ तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते इति कृष्णपदनिर्वचनेन सुखरूपत्वबोधनात् स्वतः सुखरूपस्य स्वेतरसुखे प्राप्त्यभिलाषाभावेऽपि सुखसाधनभूतां क्रीडां कृतवानित्याश्चर्यमिति भावः ॥ एतत्सूचकमेवाहो इति ॥ १६ ॥

**पुरा प्रस्तरः पादपांसुप्रचारादभूत्स्त्रीजनस्तद्द्विचार्याऽगणे किम् ॥ शुभैरिंद्रनीलाद्यनेकोपलैर्निर्मिते जानुयुग्मेन कृष्णश्चचार ॥ १७॥**

इदानीं जानुचंक्रमणमुत्प्रेक्षापूर्वकं वर्णयति ॥ पुरेति ॥ पुरा रामावतारे प्रस्तरः पाषाणः स्त्रीजनः अहल्या ॥ शेषं स्फुटं ॥ यथा रामावतारे पादस्पर्शमात्रेण पाषाणः स्त्री समजनि एवमिदानीमतिशयितशोभाधायकेंद्रनीलाद्यनेकोपलनिर्मितांगणे सर्वोपलानां स्त्रीभावापत्तौ सुतरां शोभाहानिः स्यादिति विचार्यैव पादस्पर्शं विहाय जानुभ्यामेव संचरणं कृतवानिति भावः॥भुजंगप्रयातं वृत्तं॥ १७॥

**कीर्तिं तनोमि भुवनेष्वखिलेषु नूनं तत्सूचनाय**



**भुवि विश्ववपुः स कृष्णः ॥ तां वै प्रसार्य निजवर्ष्मणि बाल्यचेष्टामाश्रित्य जानुयुगलेन सुचंक्रमीति ॥ १८ ॥**

पुनः कर्दमलेपसहितं तदेवोत्प्रेक्षापूर्वकं वर्णयति ॥ कीर्तिमिति ॥ योजना स्फुटा ॥ निखिलेषु भुवनेषु चतुर्दशसु लोकेषु ॥ कीर्तिः पंके यशस्यपीति विश्वकोशात् कीर्तिः पंको यशश्च ॥ वर्ष्म देहप्रमाणयोरित्यमरात् निजवर्ष्मणि निजदेहे तां कीर्तिं ॥ विश्ववपुरित्यनेन स्वशरीरस्य विश्वरूपत्वात्तत्र कीर्तिप्रचारे सर्वभुवनेषु अर्थसिद्ध इति सूचितं ॥ वसंततिलका वृत्तं ॥ १८ ॥

**अंजनं सुकरकंजलीलया प्रोंछति स्म हरिरस्य सद्भुतं ॥ पूर्वजस्य विकलंकसिद्धये स्पर्धिनः किल कलंकऋद्धये ॥ १९ ॥**

अथ बालस्वभावसिद्धं कराभ्यां सांजननेत्रोन्मर्दनमुत्प्रेक्षापूर्वकं वर्णयति॥अंजनमिति॥सहरिः॥सुकरेति॥सुष्ठु शोभनं यत्करकंजं करकमलं तस्य या लीला तया अंजनं प्रोंछति स्म मार्जयतिस्म॥उत्प्रेक्षते ॥ पूर्वजस्येति॥ पूर्वजस्य रामावतारे सूर्यस्य अस्य च एतदवतारसंबंधिनश्चंद्रस्य च॥विकलंकेति॥विगत :कलंकोविकलंकः कलंकाभाव इति यावत्॥तत्सिद्धये॥यद्वा भावप्रधानो निर्देशः विकलंकत्वसिद्धये इत्यर्थः ॥ तथा स्पर्धिनः आकृत्या चंद्रस्पर्द्धावतस्तत्सदृशस्य नखस्य॥यद्वा चंद्रेण सह स्पर्द्धावतः कररूपेण परिणतस्य कमलस्य कलंकऋद्धये किलेत्युत्प्रेक्षायां॥भगवतश्चंद्रसूर्यात्मकनेत्रत्वात् तन्नखानां च चंद्रस्पर्द्धित्वादेवमुत्प्रेक्षा ॥ रथोद्धतावृत्तं ॥

रो नराविह रथोद्धता लगाविति तल्लक्षात् ॥ १९ ॥

**प्रेयस्यधरा मृतमतिमधुरं नेत्याकलय्य मनसा स:॥मातृपयः पातुं तल्लालाव्याजात्समत्यजन्मृष्ट म्॥ २० ॥**

अथ बालस्वभावसिद्धं लालागलनमुत्प्रेक्षागर्भितापन्हुतिपूर्वकं वर्णयति ॥ प्रेयसीति ॥ प्रेयस्या लक्ष्म्या अधरामृतं अतिमधुरं नेति मनसा आकलय्य निश्चित्य मृष्टं तदपेक्षयाऽतिमधुरं मातृपयः पातुं तत्प्रियाधरामृतं लालाव्याजात्समत्यजत् इति योजना॥ पूर्वनिपीतं प्रियाधरामृतं अतिमधुरं न किंतु इदानीं मातृस्तन्यमेव तदधिकमिति निश्चित्य तत्पातुं यथाकथंचिन्मधुरं प्रियाधरामृतं पूर्वपीतं लालामिषेण त्यजतिस्मेति भावः ॥ २० ॥

**नासामुक्तास्पर्द्धयेव प्रमुंचँल्लालालेशं दुग्धयुक्तं स कृष्णः ॥ गृण्हन् हस्ते नावनीतं सुगोलं क्रीडत्युत्कः किंकिणीशब्दरम्यः॥ २१ ॥**

पुनर्दुग्धयुक्तद्रलनमेवोत्प्रेक्षांतरेण वर्णयन् क्रीडांतरं वर्णयति॥नासेत्यादि ॥ योजना स्फुटा ॥ लालाजलस्य दुग्धमिश्रत्वोक्त्या पूर्णं मौक्तिकसादृश्यं ॥ नवनीतस्यायं नावनीतः॥उत्कः उत्कंठितः॥ क्रीडावेशवशान्निष्पन्नो यः कटिचरणाद्यलंकारस्थकिंकिणीशब्दस्तेन रम्यः॥ शालिनी वृत्तम् ॥ शालिन्युक्ता म्तौ तगौगोऽब्धिलोकैरिति तल्लक्षणात् ॥ २१ ॥

**लालालेशलगद्रजःकणभरैराश्लिष्टमास्यंमुदाश्रीकृष्णस्य रमाधरामृतयुतं या चुंबितुं तत्परा ॥**



**श्रीनंदालयमंडनाय विधिना संपादिता या तया क्षीराब्धौ शयने रतो निजसुतः स्तन्यं पिबेत्युच्यते॥ ॥ २२ ॥**

लालेति ॥ या यशोदा मुदा हर्षेण श्रीकृष्णस्य ॥ लालेति॥स्पष्टं ॥ आश्लिष्टं संबद्धं युक्तमितियावत् ॥ रमाधरेति॥स्फुटं ॥ अनेन दौर्लभ्यं सूचितं॥एवंविधं आस्यं मुखं चुंबितुं तत्परा उत्सुका ॥याच श्रीनंदेति॥श्रीनंदगृहभूषणाय विधिना ब्रह्मणा संपादिता उत्पादिता तया यशोदया क्षीराब्धौ शयने रतोऽपि निजसुतः स्तन्यं पिबेत्युच्यते रमाधरामृतयुतमपि लालासंपृक्तरेणुविशिष्टं यन्मुखं चुंबितुं स्वयं गोप्यपि तत्परेत्येकमाश्चर्यं ॥ यश्च क्षीराब्धिशायी जन्मादिरहितः सोऽपि निजसुतत्वेन ज्ञात इत्यपरं ॥ अपरिमितक्षीरसमुद्रवास्यापि परिच्छिन्नस्वस्तन्यपाने प्रेर्यतइति तृतीयं ॥ एवंच यशोदाया निरवधिभाग्यातिशय इति ध्वनितं ॥ शार्दूलविक्रीडितं वृत्तम् ॥ ॥ २२ ॥

**स्तन्यं पिबन् हरिरहो ननु मातृकंठनिष्के निजप्रतिफलं प्रविलोक्य रोषात्॥ दंतौ निपीड्य चपलो ऽकथयद्रुदंस्तां कोऽसौ त्वया विनिहितो हृदये सुतोऽन्यः॥ २३॥**

स्तन्यमिति॥चपलः हरिः स्तन्यंपिबन् सन् मातुः कंठनिष्के॥निष्कमस्त्री साष्टहेमशते दीनारकर्षयोः ॥ वक्षोऽलंकरणे इति मेदिनीकोशात् कंठस्थहारसंबंधिपदकरूपे वक्षोऽलंकरणे निजप्रतिफलं स्वप्रतिबिंबं प्रविलोक्य रोषात् दंतौ निपीड्य रुदन्सन् त्वया

ननु निश्चयेन हृदये निहितोऽसावन्यः सुतः कइति तां मातरं प्रत्य
कथयत् ॥ अहो आश्चर्यं॥दंतौ निपीड्येत्यनेन दंतद्वयोत्पत्तियोग्यं
वयः सूचितं ॥ रोदनंच स्वप्रतिबिंबे पुत्रांतरत्वशंकापूर्वकं तस्मिन्
हृदयनिहितत्वात् प्रेमातिशयसंभावनाद्वारा स्वस्मिन्न्यूनप्रेमत्वसंभा
वनाप्रयुक्तं बोध्यं ॥ वसंततिलका वृत्तं ॥ २३ ॥

**कदाचित्॥ निशि शशिनं समवेक्ष्य प्रोच्चमसौ**
**याचते विनोदार्थं ॥ मातर्देहि ममेदं क्रीडार्थं य**
**त्स्थितं नभोदेशे॥ २४॥**

कदाचिदिति॥ उत्तरान्वयि ॥ निशीति ॥ स्फुटं ॥ मौग्ध्याभिनया
र्थं चंद्रं प्रति सामान्यतो निर्देशइदमिति ॥ विनोदार्थं क्रीडार्थं ॥
शशरूपविलक्षणपदार्थदर्शनेन क्रीडाकांक्षोदयेन याचननिर्भरद्यो
तकं शशिपदं ॥ २४ ॥

**वत्सं वात्सल्यात्सा संतोषयितुं धृतं निजोत्संगे ॥**
**सलिलैः पूर्णे पात्रे व्यदर्शयच्चंद्रमुत्सवाच्छीघ्रम्**
**॥ २५॥**

वत्समिति ॥ यशोदा वात्सल्यात्प्रेम्णा निजोत्संगे धृतं वत्सं आका
शस्थं शशिनं याचमानं श्रीकृष्णं संतोषयितुं सलिलैः पूर्णे पात्रे
उत्सवात् चंद्रं प्रतिबिंबरूपं शीघ्रं व्यदर्शयत् ॥ दृशेश्चेत्यनेनाणौ
कर्तुर्णौकर्मत्वं ॥ २५ ॥

**धृत्वांऽगुलिद्वयमयं सुखदः कराभ्यां मातुर्ननर्त**
**ललितं व्रजराजसूनुः ॥ नंदालयांगणतले विम**



**ले वितन्वत्नादं मुदा श्रुतिसुखं मणिकिंकिणी**
**नाम्॥ २६॥**

अथ मातुरंगुलिधारणपूर्वकं भगवन्नर्तनं वर्णयति ॥ धृत्वेति ॥ सु
खदः अयंव्रजराजसूनुर्नंदतनयः श्रीकृष्णः कराभ्यां मातुरंगुलि
द्वयंधृत्वा विमले निर्मले नंदालयांगणतले ललितं रमणीयं यथास्या
त्तथा मुदा हर्षेण ननर्त॥ किंकुर्वन् ॥ मंजीरसंबंधिनां मणिकिंकि-
णीनां ॥ श्रुतीति ॥श्रुतीनां श्रवणानां श्रुतिरूपाणां गोपीनां वा सु
खं यस्मात् तं नादं वितन्वन् ॥ वसंततिलका वृत्तं ॥ २६ ॥

**यद्रम्यरोमगर्ते वर्तंते विश्वगोलकास्ससुखम्॥तेन**
**सुतक्रजगोलकमाप्तुं नृत्यं वितन्यते सततम्॥ २७॥**

यदिति ॥ यस्य भगवतो रम्यरोमगर्ते विश्वगोलकाः अनेकब्रह्मां-
डानि रोमगर्तस्याऽतिविशालत्वात्परस्परसंबाधशून्यतया ससुखं य-
थास्यात्तथा वर्तंते तेन श्रीकृष्णेन ॥ सुतक्रजेति॥ उत्तमनवनीत-
गोलकमाप्तुं सततं नृत्यं वितन्यते॥अनेकब्रह्मांडगोलकविशिष्टरो-
मरंध्रोऽपि सम्यक् नृत्यं करिष्यसि चेन्नवानितगोलकं दास्यामीति
मात्रादिभिः प्रलोभितस्तं लब्धुं नृत्यति स्मेति चित्रमिति भावः ॥
॥ २७ ॥

**कवलकलितहस्तः कंसहंता कदाचिन्निखिलनिज**
**शिशूनां मध्यमेषोऽधितिष्ठन् ॥ विहृतिसमय आ**
**राद्दृघदध्योदनस्य नियतमथ सभुंक्ते मर्कटान्दर्श**
**यंस्तम्॥ २८॥**

कवलेति ॥ अथ कदाचिद्विहृतिसमये क्रीडाकाले॥ निखिलेति॥

निखिलाः संपूर्णा ये निजाः सखायः शिशवस्तेषां मध्यं नियतं नियमेन अधितिष्ठन् कवलेन अर्थाद्दध्योदनस्य तेन कलितो युक्तो हस्तो यस्यैवंभूतः कंसहंता स एषः श्रीकृष्णःत्वग्रस्य दध्योदनस्य तं कवलं आरात्समीपवर्तिनो मर्कटान् दर्शयन् सन् भुंक्ते ॥ मध्यमधितिष्ठन्नित्यत्राऽधिशीङ्स्थासामित्याधारस्य कर्मत्वं ॥ कंसहंतेति विशेषणेन स्वतो निर्भयत्वसूचनेऽपि बाललीलानुकरणेन मर्कटभयादिव बालानां मध्ये एव तिष्ठन् मर्कटान् प्रति दर्शयित्वा स्वयं भुंक्ते इति भावः ॥ मालिनी वृत्तं ॥ २८ ॥

**स्वेच्छं पुच्छाऽग्रं कराभ्यां गृहीत्वा वत्सस्याऽसौ बालभावात्सरामः ॥ सोत्साहं द्राक् संचचाराऽङ्गणेषु नंदादीनां मोदकृद्धिं वितन्वन्॥ २९॥**

वत्सपुच्छधारणपूर्वकांगणसंचरणरूपक्रीडां वर्णयति॥स्वेच्छमिति॥सरामोबलरामसहितोऽसौ श्रीकृष्णः बालभावाद्बाल्याद्धेतोः कराभ्यां स्वेच्छं स्वच्छंदं यथास्यात्तथा वत्सस्य पुच्छाग्रं धृत्वा नंदादीनां मोदकृद्धिं आनंदवृद्धिं वितन्वन् सन् सोत्साहं यथास्यात्तथा द्राक् झटिति अंगणेषु संचचार॥ मोदकृद्धिमित्यत्र कृत्यकइति प्रकृतिभावः॥शालिनी वृत्तं॥ २९॥

**ग० ॥ इत्थंविधविविधलाल्यबाल्यललितलीलालोललहरीलुलितपणानां निजजनानां क्रमेणाऽऽश्चर्याऽऽल्हादचये चौर्यकार्ये प्रवृत्तो नंदात्मजः किंचिद्वेश्म प्रविश्य॥ ६॥**





अथ दधिदुग्धादिचौर्यलीलां वर्णयति॥ इत्थंविधेति ॥ क्रमेण निजजनानां ॥ आश्चर्यैति॥ आश्चर्याल्हादयोश्चयो येनैवंविधे चौर्यकार्ये प्रवृत्तो नंदात्मजः किंचिदनिर्दिष्टं वेश्म प्रविश्य ॥ अस्योत्तरश्लोकेनान्वयः ॥ कीदृशानां जनानां ॥ इत्थंविधाः पूर्वोक्तप्रकारा विविधा अनेका या लालनीयबाल्यसंबंधिन्यो ललिताः सुंदर्यो लीलास्तासां लोलाश्चंचला या लहर्यस्ताभिर्लुलिताः शिथिलिताः पणाः व्यवहारा येषां तेषां ॥ लहरीलुलितत्वकथनेन लीलानामब्धित्वमार्थिकं बोध्यं॥ भगवद्बाल्यलीलादर्शनेन तदेकतानवृत्तित्वाद्विस्मृतलौकिकसर्वव्यवहाराणामित्यर्थः ॥ पणव्यवहार इत्यस्य रूपं पणइति ॥ ६ ॥

**प०॥अस्याऽस्ति नाम्नीति खलस्य योगस्तस्मादधः पात्यमहो विचार्य॥ तथा मुखं चक्र उलूखलं तच्चौर्ये रसानां ग्रहणाय कृष्णः॥ ३० ॥**

अथोच्चस्थानस्थितदधिदुग्धादिग्रहणार्थमुलूखलमधोमुखं स्थापितवांस्तत्रोत्प्रेक्षते ॥ अस्येति॥ कृष्णः अस्योलूखलस्य नाम्नि खलस्य खलेत्यानुपूर्व्याः अथच दुर्जनस्य योगोऽस्ति ॥ अहोधिक् ॥ अहो धिगर्थे शोके चेति मेदिनीकोशात् ॥ तस्मादधः पात्यं पातनीयमिति विचार्यैव चौर्ये चौर्यकर्मणि उच्चस्थितानां रसानां ग्रहणाय तत् उलूखलं तथामुखं अधोमुखं चक्रे॥उपजातिर्वृत्तं॥ ३०॥

**दधिदुग्धयुक्तसुशयेन लिंपते गृहनिद्रितस्य मुखहस्तमुत्सुकः ॥ननु सोऽर्भकस्य रसचौर्यकर्मणि व्रजराजसूनुरथ बालकैर्वृतः॥ ३१ ॥**

दधीति॥अथ बालकैर्वृतः रसचौर्यकर्मणि उत्सुकः स व्रजराजसूनुः श्रीकृष्णः॥ननु संभ्रमेण॥ननुशब्दो विनिग्रहे॥अनु प्रश्ने परकृताव थिकोर च संभ्रमे इति मेदिनीकोशात्॥दधीति ॥ दधिदुग्धयुक्तोयः सुशयः शोभनो हस्तः तेन गृहनिद्रितस्याऽर्भकस्य बालकस्य मुखहस्तं ॥ प्राण्यंगैकवद्भावः ॥ निद्रितस्येत्यत्र तारकादित्वादितच् ॥ लिपते ॥ गृहजनैर्दधिदुग्धलिप्तस्वबालकमुखावलोकनेन तेष्वेव चौर्यमारोपणीयमिति बुत्ध्या तथाऽकरोदितिभावः॥मंजुभाषिणीवृत्तं॥सजसाजगौभवति मंजुभाषिणीति तल्लक्षणात्॥ ३१॥

**मणिकिरणविदीर्णध्वांतधाम प्रविष्टश्चरणरणित**
**मुत्को वंचयन् किंच कृष्णः ॥ हरति दधि मनां**
**सि प्रेयसीनां मुरारिश्चपल इह नितांतं क्रोशय**
**त्यर्भकांश्च ॥ ३२ ॥**

मणीति ॥ किंच॥मणिकिरणैः स्वभूषणसंबंधिभिर्विदीर्णं नाशित ध्वांतमंधकारो यस्मिन्नेवंविधं यद्धाम गृहं तत् प्रविष्टः॥यत उत्कः चौर्ये उत्कंठितः अतश्चरणरणितं चरणधृतनूपुरशब्दं वंचयन् मुरारिरपि चपलो बालस्वभावः कृष्णो दधि च परं प्रेयसीनां मनांसि हरति ॥ इह गृहे अर्भकान् बालान्नितांतमत्यंतं क्रोशयति ॥ मालिनी वृत्तं ॥ ३२ ॥

**पुरावतारे कृतसाव्यमेतत्सीतावियोगे किल वा**
**नराणाम् ॥ कुलं तथाऽद्याऽपि विचार्य चौर्येऽद**
**दाद्रसाख्यं खलु पारितोषम् ॥ ३३ ॥**

अथ वानरेभ्यो दध्यादिदानमुत्प्रेक्षापूर्वकं वर्णयति ॥ पुरेति ॥ पु-



रा रामावतारे सीतावियोगे सति एतद्वानराणां कुलं कृतसाह्यमस्ति अद्यापि चौर्ये तथा कृतसाह्यं इति विचार्य किल रसाख्यं दध्यादिरसरूपं पारितोषं संतोषदानमददात् खलु ॥ परितोषे देयं पारितोषमिति शैषिकोऽण्॥पुरावतारे विप्रलंभशृंगाररसे इहावतारे दध्यादिरसहरणे साहाय्यकरणाद्रसरूपमेव पारितोषिकं दत्तवानिति भावः ॥ इंद्रवज्रोपेंद्रवज्रयोरुपजातिर्वृत्तं ॥ ३३ ॥

**अवनीतो नवनीतं नवनीतं निन्युरग्रतो नितरा**
**म् ॥ मर्काः कर्कशहस्तैर्हास्यरसं वर्द्धयंत एवैते ॥**
**॥ ३४ ॥**

अवनीतइति॥एते भगवदाहूताः मर्का वानराः हास्यरसं वर्द्धयंतएव संतः नवनीतं नवं च तन्नीतं प्रापितमर्थात्कृष्णेन तथाविधं नवनीतं हैयंगवीनं नितरामत्यंतं अग्रतः कृष्णस्य पुरत एव अवनीतः पृथ्व्याः सकाशात् ॥ कर्कशेति ॥ कठिनैर्हस्तैः निन्युः ॥ वानरजातिस्वभावसिद्धमेतत् ॥ ३४ ॥

**ग० ॥ इत्थंकारं चौर्यकर्मणि कृष्णकृतचापल्यमा**
**वेदयितुं तन्मातरं समागताः सुंदरीजनाः सोपालं**
**भमेवमूचुः ॥ ७ ॥**

अथ गोप्य एवं क्रियमाणचौर्यकर्म निवेदयितुमागत्य यशोदां प्रत्यूचुरित्याह ॥ इत्थंकारमिति ॥ इत्थंकारं इत्थं॥ स्पष्टं ॥ इत्थंकारमित्यत्राऽन्यथैवंकथमित्यादिना कृञो णमुल् ॥ ७ ॥

**प० ॥ भिनत्ति भांडं भवनं प्रविश्य भूर्यर्भकैर्भू**

**मिषु गोरसानाम्॥ प्रचारमेषां तनुते स नूनं व्रजेशभार्ये तव सूनुरेषः॥ ३५॥**

यदूचुस्तदाह ॥ भिनत्तीति ॥ अन्वयादि स्फुटं॥ व्रजेशभार्ये इत्यनेन तव स्वयं गोपराजपत्नीत्वाद्भूमौ दधिदुग्धादिघोलनजन्यदुःखानुभवोऽस्येवेति व्रजवासिनामस्माकं दुःखनिवारकत्वं योग्यमिति च सूचितं ॥ उपजातिर्वृत्तं ॥ ३५ ॥

**अथ कदाचित्किल॥ द्विजेषु भूत्वा प्रथमं द्विजाय मही प्रदत्ता न विशेषतोषः॥ इतीव मृल्लेशमिषेण भूमिं मुख्यद्विजेभ्यो व्यददात् स ईशः॥ ३६॥**

अथ मृद्भक्षणलीलां वर्णयति ॥ अथेत्यादिना ॥ मृद्भक्षणमुत्प्रेक्षापूर्वकं वर्णयति ॥ द्विजेष्विति ॥ प्रथमं परशुरामावतारे द्विजेषु ब्राह्मणेषु भूत्वा प्रादुर्भूय द्विजाय एकस्मै कश्यपाय मही प्रदत्ता प्रकर्षेण एकविंशतिवारं निःक्षत्रकरणरूपेण दत्ता आसीत् ॥ परंतु विशेषतोषो नाऽभूत् ॥ द्विजेषु भूत्वाऽप्येकस्मा एव दत्तेत्यतिसंतोषो नाभूत् ॥ इतीवहेतोः स ईशः ॥ मुख्येति ॥ मुख्या मुखे भवा ये द्विजा दंताः ॥ दंतविप्रांडजाद्विजाइत्यमरात् ॥ तेभ्यः ॥ श्लेषेण मुख्यब्राह्मणेभ्यः मृल्लेशमिषेण भूमिं व्यददात् ॥ विभिन्नजातावुत्पद्य बहुभ्यो द्विजेभ्यो भूमिदानमतिसंतोषकरं कृतवानितिभावः॥ उपजातिर्वृत्तं ॥ ३६ ॥

**एवं बालैर्बोधिता द्राग्यशोदा सोपालब्धुं पुत्रमागाद्धि कृष्णम्॥ वक्त्रं व्यादेहीति चोक्तस्तया ऽसौ तस्मिन्विश्वं दर्शयामास सद्यः॥ ३७॥**



एवमिति ॥ योजना स्फुटा ॥ एवं कृष्णेन मृद्भक्षितेति ॥ व्यादेहि प्रसारय ॥ तस्मिन्प्रसारिते मुखे ॥ शालिनी वृत्तं ॥ ३७ ॥

**ग० ॥ अथ कदाचित्पृथुजघनकुचाऽवलग्नभरजनितश्रमसीकरप्रकरकोरकितवदनकमला धम्मिल्लविगलदविरलपंफुल्ल्यमानानल्पमाल्यमरंदामंदसुरभितमंदिरावकाशा शशिसंकाशा यशोदा मुदा पुरा पयःपयोधेः परिमथनादिंदिरायाः प्रादुर्भावं विचार्य दध्नोऽपि निजतनयायैतादृशीमन्यां धन्यामुत्पादयितुमिवेयं स्वयं तन्निर्ममंथ॥ ८॥**

अथ यमलार्जुनभंजनलीलां वर्णयंस्तदुपोद्घाततया प्रथमं यशोदाकर्तृकं दधिमंथनमुत्प्रेक्षापूर्वकं वर्णयति॥ अथेत्यादिगद्येन ॥ अथ कदाचिदियं यशोदा स्वयं मुदा हर्षेण तद्दधि निर्ममंथेत्यन्वयः॥उत्प्रेक्षते ॥ पुरेति॥पुरा पूर्वं परितोमथनाद्धेतोः पयःपयोधेः क्षीरसमुद्रात्सकाशात् इंदिराया लक्ष्म्याः प्रादुर्भावं ॥ क्षीरादेवंविधोत्पन्ना दध्नोऽपि किमेतादृशी नोत्पद्येतेति मनसि विचार्य दध्नः सकाशादपि तादृशीं लक्ष्मीसदृशीं धन्यामन्यां निजतनयमुद्दिश्योत्पादयितुमिव॥ निजतनयायेत्यत्र कर्मणा यमभिप्रैतीत्यादिना संप्रदानत्वं ॥ तादर्थ्ये वा चतुर्थी ॥ कीदृशी यशोदा ॥ पृथुजघनेत्यादि॥ जघनशब्देन नितंबो लक्ष्यते ॥ तथाच पृथुभ्यां जघनकुचाभ्यां योऽवलग्नस्य भारस्तज्जनितोयः श्रमस्तेन यः सीकरप्रकरो घर्मोदबिंदुसमूहस्तेन कोरकितं संजातकोरकं व्याप्तमिति यावत् एवंविधं वदनकमलं यस्याः सा॥ यद्वा यशोदायाः स्थूलरूपत्वेन जघ-

नादीनामुपलक्षणतया पृथूनां सर्वांगानां यो भरो भारइत्यादि ॥ लोकेऽपि यस्याऽतिस्थूलं शरीरं तस्याऽतिश्रमो भवतीति स्फुटं ॥ तथा॥धम्मिल्लेति॥धम्मिल्लात् केशपाशात् सकाशात् मंथनसंभ्रमवशाद्विगलंति अविरलानि घनानि पंफुल्ल्यमानानि अत्यंतविकसितानि अनल्पानि बहूनि यानि माल्यानि माल्यं कुसुमतत्स्रजोरिति-मेदिनीकोशात् पुष्पाणि तेषां यो मरंदो मकरंदस्तेनामंदमनल्पं यथास्यात्तथा सुरभिताः सौगंध्ययुक्ताः कृता मंदिरस्य गृहस्य संबंधिनोऽवकाशा यया सा ॥ तथा शशिसंकाशा चंद्रसदृशी अनेन दर्शनमात्रेण सर्वजनाल्हादकत्वं बोधितं ॥ ८ ॥

**तदा किल॥प० ॥हैय्यंगवीनग्रहणाय मातुः समीपभागं हरिरेत्य नेत्रं॥ गृहीतवांस्तत्र रमा पयोधि भीतेर्भरेणाऽथ मुहुश्चकंपे॥ ३८॥**

तदेति ॥ उत्तरान्वयि ॥ हैय्यंगवीनमिति ॥ हैय्यंगवीनेत्यारभ्य गृहीतवानित्यंतं स्फुटं ॥ नेत्रं मंथगुणं ॥ नेत्रं मंथगुणे वस्त्रभेदे इति मेदिनीकोशात् ॥ तत्रेति ॥ अथ तत्र भगवत्कृतनेत्रग्रहणसमये रमा लक्ष्मीः सपत्न्युत्पत्तिसंभावनया च परं समुद्रः पुनर्मथनसंभावनया कन्यासपत्न्युत्पत्तिसंभावनया च भीतेर्भरेण मुहुर्वारंवारं चकंपे ॥ उपजातिर्वृत्तं ॥ ३८ ॥

**ग०॥ततः॥ अये मातस्तन्यं देहिदेहीतिसुधासारसदृशकलवचनाऽऽकर्णनसरसत्हृदया सा वत्समुत्संगे सोत्साहं निधाय चुंबनं विधाय तं तत्पाययितुमारभत॥ ९॥**



अयेइति ॥ योजना स्फुटा ॥ सुधाया अमृतस्य य आसारो धारासंपातः सारो वा तत्सदृशान्यतिमधुराणि यानि कलवचनानि अव्यक्तमधुरभाषणानि तेषामाकर्णनेन श्रवणेन सरसं द्रवसहितं प्रेमसहितं वा ल्हदयं यस्या स्तथाविधा सा यशोदा॥तं श्रीकृष्णं॥ तत्स्तन्यं ॥ ९ ॥

**प०॥ मत्वा पयःपानरतं हरिं मुदा दुग्धं निजां ज्ञापयितुं स्थितिं तदा॥उपर्यगात्तप्तसुभाजनस्थितं प्राप्तुं तदीयं च मुखं वरं त्हदा॥ ३९॥**

मत्वेति ॥ तदा तप्तसुभाजनस्थितं दुग्धं कर्तृ मुदा पयःपानरतं मातृस्तन्यपानरतं हरिं ह्रदा मत्वा विचार्य निजां स्थितिं ज्ञापयितुं कृष्णं प्रतिबोधयितुं च परं तदीयं भगवत्संबंधि वरं श्रेष्ठं अग्निरूपमितियावत् मुखं प्राप्तुं ॥ लुप्तोत्प्रेक्षाद्वयं॥ उपर्यगात् ॥ पयःपानरतं श्रीकृष्णं मत्वा अहमत्र पात्रे स्थितं इति स्वस्थितिं अथवास्तन्ये भगवतोऽभिलाषो न मयीति तापयुक्तत्वेन स्वस्थितिं बोधयितुं अथच अस्त्वेतदेतन्मुख एव प्रविशामीति विचार्याग्निरूपं तन्मुखं प्रवेष्टुमिवोपर्यगादिति भावः॥इंद्रवंशावंशस्थयोरुपजातिर्वृत्तं ॥ ३९ ॥

**ग०॥सा किल स्वसुतस्नेहासारसरसतया स्तनकलशयोरिव परिसंतप्तकलशेऽप्युत्कूलितं पयःपूरमवलोक्य॥ १०॥**

सेति ॥ सा यशोदा॥स्वेति॥ स्वसुते श्रीकृष्णे विषये यः स्नेहासारोऽपरिमितं प्रेमेत्यर्थः ॥ तेन सरसतया आर्द्रतया स्तनकलशयोरिव॥

पुत्रविषयकागणितप्रेमवशाद्यथा स्तनकलशयोरुत्सिक्तः पयःपूरस्तथेत्यर्थः॥ परिसंतप्तकलेशेऽपि॰ उत्कूलितं उत्सिक्तं ॥ शेषंसुगमं॥ कुचकलशयोरसरूपभगवत्संबंधात्तापाभावपूर्वकं तत्स्थरसस्योत्सेकः॥ एतस्य तु भगवत्सान्निध्याभावात्तापप्रयुक्तस्तत्संबंधिरसोत्सेक इति विवेकः॥अस्योत्तरत्रान्वयः ॥ १० ॥

**अतृप्तमुत्सृज्य सुतं यशोदया गतं तदा सोऽपि रुषा ऽरुणेक्षणः॥ तदश्मना ऽतथ्यमहो रुदन् जवात् जघान कृष्णो दधिमंडभाजनं॥ ४० ॥**

अतृप्तमिति ॥ यशोदया गतं गमनं कृतमित्यर्थः ॥ गतमित्यत्र गमधातोरविवक्षितकर्मत्वेनाऽकर्मकत्वात् भावेक्तः ॥ सःअतृप्तोत्सृष्टः कृष्णोऽपि तद्दधिमंडभाजनं ॥ जघान ताडितवान् ॥ शेषं स्फुटं ॥ ईश्वरकर्तृकरोदनस्याऽनुकरणमात्रत्वेना वास्तवत्वबोधनायाऽतथ्यमिति क्रियाविशेषणं ॥ वंशस्थं वृत्तं ॥ ४० ॥

**हैयंगवीनमथ वेश्मनि संप्रविश्य कृष्णो जघास सह मर्ककुलैः किलाऽसौ ॥ शंकाविलोलनयनो ननु मातरं द्राक् दृष्ट्वा पलायनपरः समगाद्बहिः सः॥ ४१ ॥**

अथ मर्कटैः सह नवनीतं भक्षयन् साशंक इव मातरं दृष्ट्वा पलायनपरः सन् गृहाद्बहिरगादित्याह ॥ हैयंगवीनमिति॥ स्फुटं॥ जघास भक्षितवान्॥ वसंततिलका वृत्तं ॥ ४१ ॥





**ग० ॥ इत्थं बाल्यचापल्यबलाद्बहिः पलायमानं चलत्स्वल्पकुटिलालककुलाकुलमुखेन लोलन्मिलिंदबहुलांचितं वरमिंदीवरमिवाऽनुकुर्वंतं रसरूपं नयननलिनाभ्यां स्वांगरागमिलितमकरंदमिवांऽजनमस्तृणिताश्रुझरमुत्सृजंतमसंदिग्धलक्ष्मरेखाभ्यां पदपल्लवाभ्यां पांसुपटलपरिपूरितपद्धत्यां शिल्पानल्पकौशलमिव प्रदर्शयंतमियं तस्यां त्वरणचरणपरिचरणश्रमवारिमरंदशोभितमुखारविंदा नंदालयमंडनभूता सुतमन्वांचत्॥ ११ ॥**

इत्थमिति ॥ इयं यशोदा सुतमन्वांचत् पश्चात् गच्छति स्मेत्यन्वयः॥कीदृशीयं॥तस्यां पृथिव्यां ॥ त्वरणेति॥त्वरणेन त्वरया यच्चरणाभ्यां परिचरणं संचारस्तत्प्रयुक्तो यः श्रमस्तज्जन्यं यद्वारि घर्मोदकं तद्रूपेण मरंदेन शोभितं मुखारविंदं यस्याः सा॥कमले मरंदस्यौचित्यात्॥मरंदत्वकथनेन लोकवद्दौर्गंध्यमपि वारितं भवति॥तथा॥नंदेति॥नंदालयस्य मंडनभूता भूषणभूता॥कीदृशं सुतं॥इत्थमिति॥इत्थं पूर्वोक्तप्रकारेण ॥ बाल्येति ॥ स्फुटं ॥ तथा ॥ चलदिति ॥ चंचललघुकुटिलालककुलव्याप्तमुखेन ॥ लोलदिति ॥ लोलन्मिलिंदैर्बहुलमत्यंतं यथा तथा अंचितं वरं श्रेष्ठं इंदीवरं नीलोत्पलमनुकुर्वंतमिव स्थितं ॥ तथा ॥ रसरूपं॥ रसोवैसइतिश्रुतेः ॥ तथा ॥ नयनेत्यादि ॥ नयनकमलाभ्यां ॥ स्वांगेति ॥ स्वांगसंबंधी यो रागो नीलवर्णः ॥ रागस्तु मात्सर्ये लोहितादिष्विति मेदिनीकोशात्॥तेन मिलितो मिश्रितः नीलवर्ण इति यावत् एवंविधो योमकरंदस्त

मिवेत्युत्प्रेक्षा ॥ अंजनेति ॥ कज्जलमिश्रिताश्रुप्रवाहं उत्सृजंतं ॥ तथा ॥ असंदिग्धेति ॥ असंदिग्धाः स्फुटा लक्ष्मरेखाश्चिन्हभूता रेखा ययोस्तादृशाभ्यां ॥ पदेति ॥ स्फुटं ॥ पांस्विति ॥ स्फुटं ॥ एतेन पद्धति विशेषणेन पादनिक्षेपे तच्चिन्होद्भवस्य सौलभ्यं द्योत्यते ॥ शिल्पेति ॥ शिल्पविषयकानल्पचातुर्यं प्रदर्शयंतमिवस्थितं ॥ ॥ ११ ॥

**प० ॥सत्वगुणाश्रितवृत्त्या पदमन्ये यस्य नैव संप्रापुः॥ सत्वगुणाश्रितवृत्त्या करे धृतो गोपराजपत्न्या द्राक्॥ ४२ ॥**

सत्वेति ॥अन्येमुनयः ॥ शेषः पूर्वार्द्धान्वयः स्फुटः॥ उत्तरार्धे ॥ स तु श्रीकृष्णः ॥ तुशब्दः पूर्ववैलक्षण्ये ॥ गोपराजपत्न्या यशोदया द्राक् झटिति करे धृत आसीत् ॥ अत्र हेतुगर्भं विशेषणमाह ॥ अगुणेति ॥ गुणैश्चातुर्यादिभिराश्रिता वृत्तिर्यस्यास्तथाविधान भवतीत्यगुणाश्रितवृत्तिस्तया अतिसरलयेति यावत् श्लेषेण अस्य वासुदेवस्य ॥ अकारो वासुदेवः स्यादित्यभिधानात् ॥ ये गुणास्तेष्वाश्रिता वृत्तिर्यस्यास्तथाविधया ॥ यद्वा अगुणाश्रिता प्राकृतगुणरहिता दिव्यगुणयुक्ता इति यावत् एवंविधा वृत्तिर्यस्यास्तया ॥ यद्वा अगुणे सत्वादिगुणरहिते भगवति आश्रिता वृत्तिर्यस्यास्तया ॥ अतएवच झटिति तत्करगतोभगवानभूदितिभावः ॥ ॥ ४२ ॥

**ग० ॥ इदमुलूखलं खलु गव्यचौर्यकार्यसाहाय्यवर्यमनार्यमितीवाऽवधार्य तदाऽऽर्या नंदभार्या गुणैस्तेन साकं सातंकं नंदनं साऽऽनंद॥ १२ ॥**



अथोलूखलएव श्रीकृष्णबंधने कारणसंभावना पूर्वकंतद्वर्णयति ॥इदमिति॥ तदा आर्या सानंदभार्या सातंकं सभयं नंदनं पुत्रं श्रीकृष्णं गुणगणैरज्जुसमूहैस्तेनोलूखलेन साकं सह आनंद बबंध॥अदि बंधने इत्यस्य लिटि रूपं ॥ किं कृत्वेव ॥ इदमित्यादि ॥ इदमुलूखलं खलुनिश्चये निंद्यचौर्यकर्मसाहाय्यविषये वर्यं श्रेष्ठमित्यादि स्फुटं ॥ साहाय्यं तु हस्ताऽग्राह्ये रचयति विधिं पीठकोलूखलाद्यैरित्यादिवाक्यसिद्धं ॥ अनार्यस्याऽप्यस्य भगवत्संबंधपूर्वकं गुणगणसंबंधेन तस्य तथात्वं समूलघातं घातयितुं बबंधेतिभावः ॥ १२ ॥

**प० ॥ निर्गुणमिति यत्त्वेनं वदंति विबुधा मुधाधिया न तथा ॥ तत्सूचनाय तं द्रागकरोत्तद्युक्तमप्यसावुदरे॥ ४३॥**

गुणैर्बंधने हेतुमुत्प्रेक्षते॥निर्गुणमिति॥एनं भगवंतं विबुधाः पंडिताः निर्गुणं गुणसामान्याऽभाववंतं वदंति इति यत्तन्मुधा धिया तु विचारात्मिकया धीवृत्त्यातु तथा निर्गुणो न किंतु प्राकृतगुणाऽसंस्पृष्टाऽलौकिकगुणवानित्यर्थः॥अपि संभावनायां॥अपि संभावनाप्रश्नेत्यादिमेदिनीकोशात् ॥तत्सूचनायाऽपि निर्गुणत्वाभावसूचनायेव असौ यशोदा तं श्रीकृष्णं उदरे तद्युक्तं गुणयुक्तं द्राक् झटिति अकरोत् ॥ भगवल्लीलोपयोगिपदार्थानामलौकिकत्वाद्बंधनसाधनभूतानां गुणानामप्यलौकिकत्वात्तद्बंधनेनोक्तसूचनोत्प्रेक्षणं संगच्छते ॥ ४३ ॥

**तदा किल ॥ स राजराजाऽऽत्मभवोऽर्जुनोऽसौ त्वेकोऽस्ति नान्यः सुविचिंत्य शौरिः॥ तथापि तद्युग्ममिदं किमेतद्विज्ञातुमागाद्द्रुसमीपभागं ॥ ४४॥**

तदेति ॥ बंधनानंतरसमये ॥ सइति ॥ असौ शौरिः श्रीकृष्णः सः प्रसिद्धः ॥ राजेति ॥ राजराजश्चक्रवर्ती पांडुस्तस्याऽऽत्मभवः पुत्रः श्लेषेण राजराजो धनाधिपइत्यमरात् राजराजः कुबेरस्तस्यात्मभवः पुत्रः अर्जुनः एकोहि एकएव अस्ति अन्यो न इति सुविचिंत्य तथाऽपि एवं सत्यपि इदं प्रत्यक्षतो दृश्यमानं तद्युग्मं राजराजात्मभवार्जुनयुग्मं अस्ति ॥ अत्राऽर्जुनशब्दो वृक्षविशेषपरः ॥ एतत्किमिति विज्ञातुं द्रुसमीपभागं वृक्षसमीपभागं आगात् ॥ राजराजशब्दे योगेन पांडोः रूढ्या कुबेरस्य चेत्यर्थद्वयस्य श्लेषमूलकोऽभेदाऽध्यवसायः ॥ उपजातिर्वृत्तं ॥ ४४ ॥

**दाम्ना निबद्धोऽपि तदा मुदाऽसौ तत् स्थानमंभोजविलोचनो द्रू ॥ एत्येक्षितुं तद्द्रुपदात्मजां द्राक् दार्व्याय सारेण समुच्चचाट॥ ४५॥**

दाम्नेति ॥ तदा अंभोजविलोचनोऽसौ हरिर्दाम्ना बद्धः सन्नपि मुदा नामतोऽर्जुनस्य विलोकनजन्यहर्षेण ॥ एतेनाऽर्जुने प्रेमाऽतिशयः सूचितः ॥ तत् स्थानं अर्जुनद्वयस्थानं एत्याऽऽगत्य दाढ्र्याय रूपद्वयविशिष्टो मदीयोऽर्जुनोऽथवाऽन्यावेवेमाविति निश्चयाय तद्द्रुपदात्मजां तस्याऽर्जुनस्य संबंधिनीं भार्याभूतां द्रुपदात्मजामीक्षितुमिव द्राक् झटिति सारेण बलेन द्रू वृक्षौ कर्मभूतौ समुच्चचाट उन्मूलितवान् ॥ अंतर्भावितण्यर्थः ॥ अर्जुनसन्निधौ तस्या अभावे



द्रुपदसमीपे स्थितिमनुमाय नामसाम्यात् प्रकृतद्रुपदमुन्मूलितवानिति भावः ॥ द्रुपदात्मजाविलोकनस्य द्रुपदे एव योग्यत्वात् ॥ द्रोर्वृक्षस्य पदं मूलं द्रुपदो राजाचेत्यनयोरभेदाऽध्यवसायः ॥ इंद्रवज्रा वृत्तं ॥ ४५ ॥

**द्रुभ्यां निरीतौ धनदात्मजातौ स्तुत्वा हरिं तं तदनुज्ञया तत्॥ स्थानं तदा स्थाणुसखोपलाल्यं संप्रापतुः शापविमुक्तदेहौ॥ ४६॥**

अथ वृक्षजन्मतो मुक्तौ नलकूबरमणिग्रीवाख्यौ कुबेरात्मजौ भगवंतं स्तुत्वा स्वस्थानं जग्मतुरित्याह ॥ द्रुभ्यामिति ॥ अन्वयः सुगमः ॥ निरीतौ निर्गतौ ॥ धनदस्य कुबेरस्याऽऽत्मजातौ पुत्रौ नलकूबरमणिग्रीवौ ॥ तदनुज्ञाया भगवदाज्ञया ॥ स्थाण्विति ॥ स्थाणुसखेन शंकरसुहृदा कुबेरेण उपलाल्यं स्थानं अलकाख्यं ॥ अतोऽर्हतः स्थावरतामिति नारदशापतो मुक्तशरीरौ ॥ पूर्ववदिंद्रवज्रा वृत्तं ॥ ४६ ॥

**ग० ॥ तत्र किल त्रोटनजवनटद्विटपकूटविशंकटनिकटविटपिपतनजननविकटाटच्छब्दवाचाटितेषु दिङ्मुखेषु सत्सु सदनात्सदयानंदादयस्तच्छ्रवणदूयमानहृदयास्तदा सद्यः समापद्यंत॥ १३॥**

तत्रेति ॥ तदा किल सदया दयासहिता नंदादयः॥ तदिति ॥ वृक्षपतनजन्यशब्दश्रवणखिद्यमानमानसाः संतःसदनात् स्वगृहं विहाय तत्र वृक्षप्रदेशे सद्यस्तत्कालमेव समापद्यंत प्राप्ताः ॥ तदा कदा ॥ दिङ्मुखेषु ॥ त्रोटनेति ॥ त्रोटनस्य यो जवो वेगस्तेन नटत्

कंपितं विटपकूटं शाखासमूहो ययोरेवंविधौ यौ विशंकटौ वि-शालौ॥विशंकटं पृथु बृहद्विशालं पृथुलं महदित्यमरात्॥एवंविधौ यौ निकटविटपिनौ समीपवर्त्तिनावर्जुनवृक्षौ तयोर्यत्पतनं तस्माज्जननं यस्यैवंविधो विकटः करालश्च अटन् सर्वत्र प्रसरंश्च यः शब्दस्तेन वाचाटितेषु सशब्देषु कृतेषु सत्सु ॥ १३ ॥

**प० ॥ मुक्तिं यः प्रददाति काममधुना बद्धं समालोक्य तच्चित्रंचित्रमजोऽस्ति तं निजसुतं मत्वा ऽथ नंदस्तदा॥ प्रीत्या ऽमोचयदाशु तत्र मनसा देहेन संश्लिष्य च प्रापाऽऽनंदसुधासमुद्रलहरीस्नानं व्रजाऽधीश्वरः॥ ४७॥**

मुक्तिमिति ॥ अथ व्रजाधीश्वरो नंदः यः कामं यथेच्छं मुक्तिं प्र-ददाति यश्च अजः न जायतइत्यजः जन्मरहितः अस्ति ॥ अधुना तं बद्धं समालोक्य निजसुतं च मत्वा तदा अवलोकनसमय-एवाऽऽशु शीघ्रं अमोचयत् ॥ स्वार्थेणिच् ॥ मनसा देहेन च सं-श्लिष्य गाढमालिंग्य ॥ तत्र आलिंगनसमये ॥ आनंदेति ॥ स्फुटं॥ प्रापच ॥ तत् मुक्तिदातुरजस्य भगवतो बद्धत्वेन समालोकनं सुतत्वेन मननं तन्मोचनं च चित्रंचित्रं अतिचित्रं ॥ शार्दूलविक्री-डितं वृत्तं ॥ ४७ ॥

**मौग्ध्यलीलासुधाब्ध्युत्तरंगैर्मुहुः प्लावयंस्तापतप्तान् व्रजेशादिमान्॥ श्रीयशोदां निजांस्तान्सदा रोहिणीं प्रीणयन् बालकैः क्रीडति स्म व्रजे॥ ४८॥**



मौग्ध्येति ॥ स इति शेषः॥सः श्रीकृष्णः तापतप्तान् व्रजेशादिमा-न् नंदाद्यान् श्रीयशोदांतान् प्रसिद्धान् निजान् स्वकीयान् गोगो-प्यादीन् रोहिणीं च ॥ मौग्ध्येति ॥ मौग्ध्यं बाल्यं तत्संबंधिन्यो या लीलास्ता एव सुधाऽब्धिरमृतसागरस्तस्योदुत्कृष्टा उन्नता वा ये तरंगास्तैः कृत्वा मुहुर्वारंवारं प्लावयन् स्नेहार्द्रान् कुर्वन् ॥ अ-थच ॥ सदा प्रीणयन् संतोषयन् सन् बालकैः सह व्रजे क्रीडति स्म ॥ तापश्च नंदयशोदयोरप्रजस्त्वप्रयुक्तो रोहिण्याः सौहार्दात्त-त्पाल्यत्वेन एतावत्पर्यंतं पालकविरहप्रयुक्तो गोपानां तत्प्रयुक्त ए-व गोपीनां श्रुतिरूपावस्थायां प्रत्यक्षदर्शनपूर्वकं वरदानसमयप्र-भृत्येतावत्पर्यंतं वियोगप्रयुक्तो बोध्यः ॥ स्रग्विणी वृत्तं ॥ रैश्चतु-र्भिर्युता स्रग्विणी संमतेति तल्लक्षणात् ॥ ४८ ॥

**ग० ॥ इत्थमुत्थिताऽनेकोत्पातव्यथितचित्ता नंदं त्तत्तापमावेद्य तेन सह संमंत्र्य प्राप्ततदाज्ञाः प्राज्ञा उपनंदप्रभृतयः करिष्यमाणनिजरक्षणविचक्षणतां तत्क्षणं ज्ञात्वेव गोवर्धनाय तं गोवर्धनं संभावयितुं गोधनानि पुरोधाय विघ्नरोधाय गोधनास्तदुपत्यकालंकारभूतं वृंदावनं वृंदावनास्ते ऽभजंत॥ १४॥**

अथ वृंदावनगमनं प्रस्तौति ॥ इत्थमिति ॥ प्राज्ञा बुद्धिमत्तरा उ-पनंदादयस्ते गोपाः तत्क्षणं गोवर्धनाय गवां वृद्धये विघ्नरोधाय अनेकविधासुरकृतांतरायविघातार्थं च तमन्वर्थनामानं गोवर्द्धनं संभावयितुमिव सत्कर्त्तुमिव ॥ तदिति ॥ तस्य गोवर्द्धनस्य या

उपत्यका आसन्नभूमिस्तस्या अलंकारभूतं वृंदावनं अभजंत प्राप्ताः ॥ कीदृशास्ते ॥ इत्थं पूर्वोक्तप्रकारेण ॥ उत्थितेति ॥ स्फुटं ॥ उत्पाताः पूतनाप्रभृतियमलार्जुनपतनांताः ॥ तथा ॥ नंदमित्यादि ॥ नंदं प्रति स्वकीयं वृत्तांतं आवेद्य बोधयित्वा ॥ बुध्यर्थकत्वेनाऽणौ कर्तुर्णौ कर्मत्वं॥ तेन नंदेन सह संमंत्र्य सम्यङ्मंत्रं विधाय ॥ प्राप्तेति ॥ प्राप्तनंदाज्ञाः ॥ तथा ॥ गोधनाः गाव एव धनं येषां ते गोधनाः ॥ तथा ॥ वृंदावनाः वृंदं स्वयूथं अवंति रक्षंति ते वृंदावनाः ॥ रक्षणीयनिजजनपरिवृता इत्यर्थः ॥ किंकृत्वा ॥ गोधनानि पुरोधाय पुरस्कृत्य ॥ गोवर्द्धनस्य संभावने कारणमुत्प्रेक्षते ॥ करिष्यमाणेत्यादिज्ञात्वेवेत्यंतेन ॥ करिष्यमाणं यन्निजरक्षणं भावींद्रकोपसामयिकं तद्विषये विचक्षणतां दक्षत्वं ज्ञात्वेव॥ ॥ १४ ॥

**प० ॥ वलद्वायुवेगात्सुदोधूयमानद्रुमंदारकुंदाद्यमंदोत्सुगंधैः॥ प्रजुष्टेऽथ नंदस्य वृंदावने नंदनः क्रीडति स्माऽर्भकै रौहिणेयः॥ ४९॥**

वलदिति॥अथ वृंदावनगमनानंतरं वृंदावने नंदस्य नंदनः श्रीकृष्णः रौहिणेयो बलरामश्च अर्भकैः सह क्रीडति स्म॥ कीदृशे वृंदावने॥ वलदिति ॥ वलन्संचरन् योवायुस्तद्वेगात् ॥ स्थिति ॥ सुतरां दोधूयमानाः अतिशयेन कंपमाना ये द्रवो वृक्षास्ते च मंदारकुंद शब्दाभ्यां तत्पुष्पाणि तदादीनाममंदा बहुला उद्भूता ये सुगंधास्ते च तैः प्रजुष्टे प्रकर्षेण युक्ते ॥ वायुवेगात् सुतरां कंपमाना इ-





ति सौगंध्याऽतिशयव्यंजकं विशेषणं बोध्यं ॥ भुजंगप्रयातं वृत्तं ॥ ४९ ॥

**ग० ॥ ततः क्रमेण रामेण सह तस्मिन्वत्सचारण परायणे सति कदाचित्॥ १५॥**

अथ वत्सासुरवधलीलां प्रस्तौति ॥ तत इति ॥ ततस्तस्मिन् श्रीकृष्णे ॥ शेषं स्फुटं ॥ १५ ॥

**प० ॥ वत्साख्योवत्सवर्गानविशदतिबलाद्वत्सवेषं वितन्वन् द्रोग्धुं नंदोद्भवेऽस्मै सपदि खलममुं सोऽपि मत्वाऽथ दैत्यं॥ पाल्यानां लाल्यरूपं वहति जडमतिर्स्सिंहिकासूनुवद्यत्तस्माद्वध्योऽत्र नूनं मम धुरि रिपुणा प्रेषितस्स्वार्थसिध्यै॥ ५०॥**

वत्साख्यइति॥ वत्साख्योऽसुरः अतिबलात्॥ नंदेति॥ नंदादुद्भवतीति नंदोद्भूस्तस्मै अस्मै श्रीकृष्णाय द्रोग्धुं॥ क्रुधहेत्यादिना चतुर्थी॥ वत्सवेषं वितन्वन् सन् वत्सवर्गानविशत् ॥ अथ सपदि प्रवेशकाल एव अमुं वत्सं खलं दैत्यं मत्वा यत् यतो रिपुणा कंसेन स्वार्थसिध्यै अत्र मम धुरि प्रेषितः यतश्च जडमतिः यतश्च सिंहिकासूनुवत् राहुवत् पाल्यानां वत्सानां लाल्यमुपलालनीयं यद्रूपं तद्वहति तस्माद्धेतोर्नूनं निश्चयेन वध्यो वधार्होऽस्ति एवं विचार्येत्युत्तरश्लोकस्थेनान्वयः ॥ यथा ऽमृतपानवेलायां पाल्यलालनीयदेवरूपधारी राहुर्हतस्तथैवायं वध्य इति भावः ॥ एतेन हतस्यापि राहोर्यथाऽमृतलाभस्तथैतस्यापि साक्षाद्भगवता हननादमृतलाभ इति ध्वनितं ॥ स्रग्धरा वृत्तं ॥ ५० ॥

एवं विचार्य तं वत्सं विना युद्धं व्यनाशयत्॥विभुः
स्वलांछने दोषापत्तिः स्यादिति चिंतयन्॥ ५१ ॥

एवमिति ॥ विभुः श्रीकृष्णः तं वत्सं युद्धं विना व्यनाशयत् नाशयति स्म ॥ युद्धं विना हनने कारणभूतं विचारांतरं संभावयन्नाह॥लांछनइति॥लांछने स्वकीये श्रीवत्साख्ये चिन्हे विषये दूषणापत्तिः स्यादिति सुविचिंतयन् इवेति लुप्तोत्प्रेक्षा॥यद्यहं युद्धं कृत्वा नाशयिष्यामि तदा युद्धप्रसंगेन तत्पादप्रहारे जाते वत्सासुरपादाहतिरूपं श्रीवत्सलांछनं भगवद्धृदये वर्त्तत इति लोकप्रवादः स्यादिति तन्निवृत्तये विनायुद्धमेव तन्नाशं कृतवानिति भावः ॥ ५१ ॥

तदानीं ॥ आनंदाश्रुणि नेत्राब्जात् कराब्जात्कुसुमानि च॥ मुखाब्जाज्जयशब्दं द्राक् त्रिदशास्ते समत्यजन्॥ ५२ ॥

तदानीमिति ॥ वत्सासुरहननोत्तरकाले ॥ आनंदेति ॥ स्फुटं॥५२॥

अथ॥ भ्रमद्भृंगवृंदावृतैः पद्मपुंजैर्मिलन्मारुतैर्मेदुरे नंदसूनुः॥ शरच्चारुचंद्रांशुरेणूज्वलेऽस्मिन्सरित्तीरदेशेऽसकृत्क्रीडति स्म॥ ५३॥

बकवधं प्रस्तौति ॥ अथेति ॥ बकहननानंतरं ॥ भ्रमदिति ॥ नंदसूनुः श्रीकृष्णः सौगंध्यलोभाद्भ्रमद्भृंगवृंदैः संवृतैः पद्मसमूहैः तथा मिलद्भिस्तादृशपद्मसंगतैर्मारुतैर्वायुभिः मेदुरे परिपूर्णे॥ अनेन वायौ सौगंध्यं द्योतितं ॥ तथा शरत्कालिकचंद्रकिरणवत् शुभ्रैरेणुभिर्धवले अस्मिन्वृंदावनसंनिकृष्टे सरित्तीरदेशे यमुनातीरप्रदेशे असकृत् क्रीडतिस्म ॥ भुजंगप्रयातं वृत्तं ॥ ५३ ॥



ग० ॥तदंतरे कदाचित् कृपामृतवर्षणचणकृष्णनीरदेन सह क्षणमपि हंससुतायास्साहचर्यं चिरंतदानीं मेदिन्यामसहमान इव मात्सर्यात्सपदि स बकः समापद्य सद्योऽमुं समाजगाल॥ १६ ॥

तदंतरइति ॥ तदंतरे कदाचित् ॥ कृपेति ॥ कृपैवाऽमृतं सुधा जलं वा तस्य वर्षणेन वित्तः कृपावर्षणचणः एवंविधो यः कृष्णाख्यो नीरदो मेघः श्लेषेण कृष्णनीरदः सजलत्वात् श्यामो मेघस्तेन सह हंसेति ॥ हंसस्य सूर्यस्य या सुता यमुना तस्याः श्लेषेण हंसस्य पक्षिविशेषस्य सुताया हंस्याः चिरं चिरकालं साहचर्यं तदानीं क्षणं क्षणमात्रमपि मेदिन्यां असहमान इव स बको बकासुरः पक्षिविशेषश्च मात्सर्यात्सपदि द्रुतं समापद्य प्राप्य अमुं श्रीकृष्णं सद्यः समाजगाल गिलितवान्॥हंस्या मेघस्य साहचर्यं तदपि मेदिन्यां तदपि चिरमदृष्टपूर्वं दृष्ट्वा बकः सदा मेघसहचारितो जात्या हंसप्रतिस्पर्धी चातस्तदसहमानस्तद्वियोगं कर्तुं श्रीकृष्णं गिलति स्मेति भावः॥ १६ ॥

प० ॥ कृष्णमेघमुखे युक्तं बकागमनमत्र तत् ॥ चित्रं तस्य मुखे ह्यासीत् कृष्णमेघागमोऽधुना॥ ॥ ५४ ॥

तद्गिलनमेव श्लेषमूलकचित्रोद्भावनपूर्वकं वर्णयति ॥ कृष्णेति ॥ कृष्णमेघमुखे कृष्णमेघस्य सजलमेघस्य मुखे आरंभे बकागमनं

युक्तं ॥ अत्र यमुनातीरे अधुना तस्य बकस्य मुखे आस्ये कृष्ण मेघागमः कृष्ण एव मेघस्तस्यागम आसीत् तत् चित्रं ॥ ५४ ॥

**तप्ततालुतलस्तं वै चच्छर्दाऽऽशु खलः खलु ॥ तस्य तेन हि संप्राप्तं कृष्णवर्त्मत्वमत्र तत् ॥ ५५ ॥**

तप्तेति॥हि यस्मात्तस्य बकस्य तेन तालुना कृष्णवर्त्मत्वं कृष्णमार्गत्वं श्लेषेण अग्नित्वं प्राप्तं तत्तस्माद्धेतोस्तप्तं तापयुक्तं तालुतलं यस्य स तथाविधः खलो बकः अत्र वै अस्मिंस्तापसमयएव तं श्रीकृष्णं आशु शीघ्रं चच्छर्द उद्गिरति स्म खलु ॥ ५५ ॥

**तदा तु ॥ मीनाक्षीहृदयं गमः किल पुरोभाव्य स्स्मराख्यात्मजो यस्य प्राथमिकं जलेचरवपु र्वेदैः परं गीयते ॥ सोऽयं हंससुतातटेऽप्रतिभटे वृद्धिं गतं सुद्रुतं चंडं तुंडत एव तं रिपुबकं युक्तं क्रुधाऽपाटयत् ॥ ५६ ॥**

तदात्विति ॥ छर्दनोत्तरकालएव ॥ मीनाक्षीति ॥ सोऽयं श्रीकृष्णः अप्रतिभटे न विद्यते प्रतिभटः प्रतिपक्षी यस्य तदेवंभूते अनुपमे इत्यर्थः ॥ हंससुतातटे यमुनातटे वृद्धिं गतं प्राप्तं ॥ अनेन अयोग्यमिच्छन् पुरुषः पतत्येव न संशय इति न्यायेन हंससुतासमीपे अयोग्यां स्वीयां वृद्धिं प्रदर्शयन् बकः पाटनयोग्य इति सूचितं ॥ चंडं भयंकरं तं रिपुभूतं बकं क्रुधा क्रोधेन तुंडत एव मुखत एव सुद्रुतं अत्यंतत्वरया अपाटयत् विदारयति स्म ॥ युक्तमेतत् ॥ मुखेनैवाऽपराधकरणात्तत एव पाटनं युक्तमिति भावः ॥ सकः ॥ यश्च किल ॥ मीनाक्षीति ॥ मीनाक्षीणां स्त्रीणां हृदयंगमो मनो-



हरः ॥ एतेन स्वप्रियाया मीनसदृशाक्षित्वेन तद्विरुद्धत्वं तस्य सूचितं ॥ यस्यच ॥ स्मरेति॥स्मरनामकः पुत्रः पुरोभाव्यः अस्ति ॥ अनेन स्मरस्य स्वसुतस्य मीनध्वजत्वेन स्वपुत्रविरुद्धत्वं बकस्य सूचितं ॥ यस्य च प्राथमिकं अवतारक्रमे प्रथमभवं जलेचरवपुर्मीनवपुर्वेदैः परमुत्कृष्टं यथातथा गीयते ॥ अनेन स्वविरोधित्वं सूचितं ॥ मीनबकयोः स्वाभाविकं वैरं हि सुप्रसिद्धतरं ॥ शार्दूलविक्रीडितं वृत्तं ॥ ५६ ॥

**तद्देहशौभ्र्यसामान्यं समीक्षितुमिवाऽमराः ॥ प्रसूनानि वलक्षाणि तेंऽतरिक्षात्समाक्षिपन् ॥ ५७ ॥**

तत्समये देवकृतपुष्पवृष्टिमुत्प्रेक्षापूर्वकं वर्णयति ॥ तदिति ॥ ते अमराः ॥ तद्देहेति॥बकदेहशुभ्रत्वसाम्यं अर्थात् स्वकीयैः कल्पवृक्षकुसुमैः ॥ वलक्षाणि धवलानि ॥ वलक्षो धवलोर्जुनइत्यमरः ॥ समाक्षिपन्ववृषुरित्यर्थः ॥ शेषं सुगमनं ॥ ५७ ॥

**अथ कदाचित् ॥ कोशीभूतालिवृंदाप्तमिंदिरामंदिरं रविः ॥ चक्रे विशीर्णं सामोदं करैश्चापत्यवत्सलः ॥ ५८ ॥**

अथाऽघासुरवधवत्साहरणलीले वर्णयितुं तदुपोद्घाततया प्रातरुत्थानानंतरमद्यतनं प्रथमभोजनं वनएव कर्तव्यमित्यभिप्रायवतो भगवतो वत्ससहितस्य वनप्रवेशपूर्वकमनेकविधं क्रीडनं वर्णयिष्यन्नादौ प्रातःकालं वर्णयति ॥ अथेति ॥ कोशीभूतेति ॥ अपत्यवत्सलः अपत्ये यमुनारूपे वत्सलः रविः सूर्यः करैः किरणैः श्लेषेण स्वहस्तैः ॥ कोशीभूतेति ॥ कोशीभूतं कुड्मलीभूतं च तदलि-

वृंदेन भ्रमरसमूहेनाऽऽप्तं प्राप्तं पक्षे कोशीभूतं धनागारीभूतं च तदालीनां सखीनां वृंदेनाऽऽप्तं ॥ तथा सामोदं सौगंध्यविशिष्टं हर्षविशिष्टं च इंदिरामंदिरं लक्ष्मीगृहं पद्मं विशीर्णं शिथिलं पक्षे विकसितं चक्रे ॥ सूर्यस्य स्वतनयाया यमुनायाः सपत्नीभूताया इंदिराया गृहभंगकरणमपत्यवत्सलत्वाद्युज्यते इतिभावः ॥ ५८ ॥

**ग० ॥ तत्समयेऽनेकवयस्योपास्यमानपार्श्वभागो द्विगुणितानुरागो व्रजजननयनचकोरानंददानदक्षः कलानाथो व्रजनाथो विविधैर्वनविहारैस्तैररमत ॥ १७ ॥**

तत्समयइति ॥ प्रातःकाले व्रजनाथः श्रीकृष्णः तैर्मुष्णंतोऽन्योन्यशिक्यादीनित्यादिना श्रीमद्भागवतोक्तैः विविधैः अनेकप्रकारैर्विहारैर्वनसंबंधिक्रीडाभिः अरमत ॥ कीदृशः ॥ अनेकेति ॥ स्पष्टं ॥ तथा ॥ द्विगुणितेति ॥ प्रातःकालीनशोभावलोकनेन अनेकवयस्योपास्यमानपार्श्वभागत्वेन च द्विगुणितो द्वैगुण्यरूपातिशयं प्राप्तोऽनुरागः क्रीडाविषयिणी प्रीतिर्यस्यैवंभूतः॥तथा॥व्रजेति॥व्रजसंबंधिजननयनरूपाणां चकोराणामानंददाने दक्षः कलानाथश्चंद्ररूपः ॥ १७ ॥

**प० ॥ वैकर्तनीतटतरुप्रतिघातमंदवायूत्तरंगितसुगंधसुबंधुरेऽत्र॥ वृंदावने तनुभृतां सुखदेऽतिरम्ये कृष्णग्रहाय समगात् स भुजंगदेहः॥ ५९ ॥**

वैकर्तनीति ॥ अत्र वृंदावने इत्याद्यन्वयः सुगमः ॥ भुजंगदेहः सर्पाकारः ॥ सः अघासुरः ॥ कृष्णग्रहाय कृष्णं गिलितुं ॥ कीदृशे



वृंदावने ॥ वैकर्तनीत्यादि॥ विकर्तनः सूर्यस्तस्य स्त्र्यपत्यं वैकर्त्तनी यमुना तस्या यत्तटं तत्संबंधिनो ये तरवस्तैर्यः प्रतिघातो वेगनिरोधस्तेन मंदो यो वायुस्तेनोत्तरंगितो बहुलीकृत इति यावत् ॥ एवंविधो यः सुगंधस्तेन सुतरां बंधुरे युक्ते ॥ तथा ॥ तनुभृतां सुखदे अतिरम्येच ॥ वसंततिलका वृत्तं ॥ ५९ ॥

**पृषोदरोऽसुरो मुखं विधाय तादृशं दृशा समीक्ष्य शौरिजं स तत्क्षणं क्षमास्थितस्तदा॥ तथाऽपि तद्विहीनतां समाचचार चारके गवां यतो नियोजितः स कंसवैरिणा क्रुधा॥ ६०॥**

पृषोदरइति॥पृषोदरः पृषद्विंदुवदुन्नतमुदरं यस्यैवंविधः सः असुरः अघासुरःमुखं तादृशमुन्नतं विधाय तत्क्षणं शौरिजं वसुदेवपुत्रं श्रीकृष्णं दृशा समीक्ष्य यद्यपीतिशेषः क्षमास्थितः क्षमायां पृथिव्यां स्थितः श्लेषेण क्षमायां क्षांतौ स्थितः तथाऽपि तदा गवां चारके श्रीकृष्णे विषये तद्विहीनतां क्षमाविहीनतां सम्यगाचचार॥ क्षमाविहीनत्वे हेतुमाह ॥ यतइति॥यतः सः अघासुरः कंसाख्येन वैरिणा क्रुधा बकादिवधप्रयुक्तरोषेण नियोजितः ॥ पंचचामरं वृत्तं ॥ ॥ ६० ॥

**पृषोदरत्वमाश्रित्य वर्णहीनोऽपि सत्वरम् ॥ प्रयोगितामवापाऽऽस्ये कृष्णेनाऽसौ सुपूर्विकां॥ ६१॥**

पृषोदरत्वमिति ॥ असावघासुरः ॥ पृषोदरत्वमिति॥ पूर्वोक्त एवार्थः॥पक्षे लक्षणया पृषोदरादित्वं आश्रित्य वर्णहीनोऽपि असुरत्वेन वर्णचतुष्टयापेक्षया हीनोऽपि ॥ पक्षे वर्णेन तकाररूपेण ही-

नोऽपि आस्ये मुखे कृष्णेन सह सुपूर्विकां प्रयोगितां सुप्रयोगितां शोभनप्रकृष्टयोगवत्त्वं॥पक्षे सुप्रयुक्तत्वं सत्वरं अवाप ॥ पृषोदरशब्दो यथा पृषोदरादिगणपठितत्वाद्वर्णहीनोऽपि साधुप्रयोगयोग्यो भवति एवमयमसुरोऽपि तद्भावमाश्रित्य मुखावच्छेदेन कृष्णसंयोगित्वमवापेति भावः ॥ ६१ ॥

**पूर्वं निनादेन च दैत्यरोषाच्छलात्पदांगुष्ठनखेन नूनम्॥ब्रम्हांडभेदः कृत इत्यवेत्य तं कर्तुमुच्चैर्ववृधे गलेऽसौ॥ ६२ ॥**

अथ तद्गले भगवतो वर्धनमुत्प्रेक्षापूर्वकं वर्णयति॥पूर्वमिति॥असौ श्रीकृष्णः तं ब्रह्मांडभेदं अर्थादघासुरब्रह्मरंध्रभेदं कर्तुं गले ऽर्थादघासुरस्य उच्चैर्ववृधे ॥ उत्प्रेक्षते॥ पूर्वमिति ॥ पूर्वं नृसिंहावतारे दैत्यरोषात् दैत्ये हिरण्यकशिपौ यो रोषः क्रोधस्तस्माद्धेतोर्निनादेन ध्वनिना ॥ उक्तं च श्रीमद्भागवते सप्तमस्कंधे ॥ तदैवतस्मिन्निनदोऽतिभीषणो बभूव येनांऽडकटाहमस्फुटदिति ॥ तथा ॥ वामनावतारे छलात् बलिच्छलात् पदांगुष्ठनखेन ब्रह्मांडभेदः कृत इत्यवेत्य ॥ नूनमित्युत्प्रेक्षायां ॥ उपजातिर्वृत्तं ॥ ६२ ॥

**ग०॥ तदनु तदंगसंगनिरुद्धनीरंध्रतद्ब्रम्हरंध्रेसरंध्रे तस्मात् बहुकालभवद्रोधविशुद्धतच्छरीरतेजश्छटेव ज्योतिर्बहिर्वेगान्निरगात्॥ १८॥**

तदन्विति ॥ तदनु वर्धनानंतरं ॥ तदंगेति ॥ तस्य श्रीकृष्णस्य योगसंगस्तेन निरुद्धं अतएव नीरंध्रमनवकाशं यत्तस्याऽघासुरस्य





ब्रह्मरंध्रं तस्मिन् सरंध्रे सच्छिद्रे सति ॥ बह्विति ॥ बहुकालपर्यंतं भवन् रोधोरोधनं यस्या एवंभूता विशुद्धा स्वभावतो निर्मला या तस्य श्रीकृष्णस्य शरीरसंबंधिनी तेजश्छटा सेव ॥ तेजसः कृष्णत्वव्यावृत्तये विशुद्धेति विशेषणं ॥ ज्योतिस्तज्जीवज्योतिर्वेगात् बहिर्निरगात् ॥ १८ ॥

**प०॥ निजदृष्ट्या सुधावृष्ट्या ऽजीवयन्निजबालकान्॥ वत्सानुत्साहतो वत्सो नंदस्याऽऽनंददायकः ॥६३॥**

निजेति ॥ योजनार्थौ स्फुटौ ॥ सुधाया वृष्टिर्यस्याः सकाशात् तादृश्या निज दृष्ट्या दृष्टिरूपया सुधावृष्ट्या इतिवा ॥अजीवयत् जीवयतिस्म ॥ अत्र जीवयन्नित्यस्य शत्रंतत्वेन स्फुटतया प्रतीतेः क्रियागुप्तचित्रमपि बोध्यं ॥ बालकेषु निजत्वं सखित्वेन भक्तत्वेन च ज्ञेयं ॥ ६३ ॥

**तेन दुर्वासितां क्षोणीं सुगंधिं कर्तुमादृताः ॥ सुपर्वाणस्सुमनसस्सुमोच्चयमथाऽत्यजन्॥ ६४ ॥**

देवकृतां पुष्पवृष्टिमुत्प्रेक्षापूर्वकं वर्णयति ॥ तेनेति ॥ योजना स्फुटा ॥ तेन अघासुरेण ॥ शोभनमसुरहननेन सुप्रसन्नं मनो येषां ते तथाविधाः सुपर्वाणो देवाः ॥ सुमोच्चयं पुष्पसमूहं ॥ अत्र मूले सुपर्वाणः सुमनस इति कोशाऽनुपूर्वीसंग्रहश्चित्रं ॥ ६४ ॥

**तदनंतरम् ॥ सुकंजपुंजसन्मरंदपानमत्तषट्पदप्रपंचरंजिते तटे प्रमंदितप्रभंजने॥निकुंजवृंदकोकि**

**लाघमंदसिंजिते विभुः स बालकैरभुंक्त यत्स्वमातृदत्तभोज्यकं ॥ ६५ ॥**

अथ पूर्वसंकेतितं वन एव प्रातर्भोजनं श्रीयमुनातटे कृतवानित्याह ॥ तदनंतरमिति ॥ अघासुरनाशपूर्वकगोपवत्सोज्जीवनानंतरं ॥ सुकंजेति ॥ स विभुः श्रीकृष्णः यत् स्वमातृदत्तभोज्यकं यशोदया दत्तं भोजनवस्तु तत् तटे यमुनातटे बालकैः सह अभुंक्त ॥ कीदृशे तटे ॥ सुकंजेत्यादि ॥ सुष्ठु कंजानां कालप्रयुक्तसंकोचविकासशून्यकमलानां पुंजस्य संबंधी यः सन्नासववन्मादकतया समीचीनो मरंदस्तस्य पानेन मत्तानां षट्पदानां प्रपंचेन इतस्ततः संचरणगुंजारवादिक्रीडाविस्तारेण रंजिते ॥ तथा ॥ प्रमंदितेति॥निबिडवृक्षादिभिः प्रकर्षेण मंदीकृतः प्रभंजनः पवनो यस्मिस्तादृशे ॥ तथा ॥ निकुंजेति ॥ निकुंजानां लतागृहाणां वृंदस्य संबंधिनो ये कोकिलादयः पिकशुकसारिकादयः पक्षिणस्तेषाममंदानि सिंजितानि कूजितानि यस्मिस्तथाविधे॥ आद्ये सुकंजेत्यनेन सन्मरंदेत्यनेनच यमुनासंबंधिकमलानामप्यलौकिकत्वेन तत्संबंधिमरंदस्याप्यक्षय्यत्वबोधनेन तत्संबंधिनां सर्वेषामप्यलौकिकत्वं बोधितं॥ तृतीयविशेषणे भूषणध्वनिवाचकसिंजितपदेन कोकिलादीनां तटभूषणत्वं व्यज्यते ॥ पंचचामरं वृत्तं ॥ ६५ ॥

**तदा स सत्वरं विधिः समेत्य वत्सवत्सपान् समाहरत्पितुर्हरेः स्ववत्सभावमादिमं ॥तदात्मसंभवो वियत्पथेन तैर्वृतोऽभ्यगान्निजं गृहं प्रविस्मृतं स्मृतेः पथे सृजन्निव ॥ ६६ ॥**



तदेति ॥ तदा भोजनावसरे तदात्मसंभवः तस्य भगवत आत्मसंभवः पुत्रः स विधिर्ब्रह्मा समेत्य सत्वरं यथास्यात्तथा वत्सान् वत्सपांश्च समाहरत् ॥ अथ तैर्वत्सवत्सपैर्वृतो वेष्टितस्तन्मध्यवर्ती सन्निति यावत् ॥ वियत्पथेनाऽऽकाशमार्गेण निजं गृहं सत्यलोकाख्यमभ्यगात्॥ तन्मध्यवर्ती सन्नेव ययौ नतु तानग्रतः पृष्ठतो वा कृत्वेत्यत्र हेतुमुत्प्रेक्षते ॥ आदिममपि प्रविस्मृतं अवतारांतरालंबनाद्विस्मृतत्वेन संभावितं स्ववत्सभावं स्वस्य यो वत्सभावो वत्सत्वं अपत्यत्वमिति यावत् पितुः स्वजनकस्य हरेः स्मृतेः पथे मार्गे ॥ वाटः पथश्च मार्गश्चेत्यभिधानात् ॥ सृजन्निव कुर्वन्निवेत्यर्थः ॥ अवतारांतरग्रहणेन स्वनिष्ठवत्सत्वविषयकस्मृत्यभावं संभाव्य वत्समध्यवर्तिनो मम वत्सदर्शनप्रसंगेन दर्शने सति पुनः स्मृतिः स्यादिति तन्मध्यवर्ती सन्नेव ययाविति भावः ॥ पंचचामरं वृत्तं ६६॥

**ग० ॥ एवंविधं विधिदुर्विलसितं विभुर्विज्ञाय॥ ॥ १९ ॥**

**प० ॥ वत्सवत्सतरवत्सपाकृतिः कृष्णएव स बभूव तत्क्षणं॥ स्नेहवृद्धिमकरोद्व्रजौकसामन्वयाद्‌झटिति वत्सरस्ततः ॥ ६७॥**

एवं ब्रह्मणाकृते भगवानितस्ततो वत्सादीनां शोधनं कृत्वा ब्रह्मकृतमेतत्सर्वमिति निश्चित्य वत्सादिरूपः स्वयमेव यावदेकं वर्षमभूदित्याह ॥ एवमित्यादिना गद्येन वत्सेत्यादिपद्येन च ॥ स विभुरेवं पूर्वोक्तप्रकारेण विधेर्दुर्विलसितं दुश्चेष्टितं विज्ञाय तत्क्षणं तस्मिन्नेव क्षणे वत्सा अल्पाः वत्सतरा दम्याः ॥ दम्यवत्सतरौसमावित्य-

मरात् ॥ वत्सपा गोपालाश्च तदाकृतिस्तद्रूपः कृष्णएव बभूव॥ अथच व्रजौकसां गोगोप्यादीनां स्नेहऋद्धिं अकरोत् ॥ ततस्तदनंतरं एकः संवत्सरो झटिति अन्वयात् अतीतोऽभूत् ॥ तदुक्तं श्रीमद्भागवते ॥ गोगोपीनां मातृताऽस्मिन्सर्वा स्नेहर्धिकां विना ॥ पुरोवदास्वपि हरेस्तोकता मायया विनेति ॥ रथोद्धता वृत्तं ॥ रो नराविह रथोद्धता लगाविति लक्षणात् ॥ १९ ॥ ६७ ॥

ग० ॥ ततः परं मया परिगृहीतगोगोपवत्सस्य नंदवत्सस्य कथं दिनचर्येति विचार्य विबुधवर्यस्तत्र समाजगाम ॥ २० ॥

ततो ब्रह्मा मया यस्य गोगोपालहरणं कृतं तस्य श्रीकृष्णस्य दिनचर्या कथमस्तीति विचार्य तां द्रष्टुमगादित्याह॥ ततइति ॥ स्पष्टं॥ विबुधवर्यो ब्रह्मा॥तत्र वृंदावने ॥ २० ॥

प० ॥ दृष्ट्वा यथाविधमहो विधिरत्र सर्वं चित्रप्रपूरजठरे निममज्ज मंक्षु॥ कौमोदकीसरसिजारिदरैः सुयुक्तै र्हस्तैश्च कौस्तुभकिरीटविभूषणैर्युक् ॥ ६८ ॥

दृष्ट्वेति ॥ विधिर्ब्रह्मा अत्र व्रजे प्रथमं सर्वं वत्सवत्सपादिकं यथाविधं पूर्ववद्दृष्ट्वा चित्रप्रपूरजठरे निममज्ज ॥ पश्चात्पूर्वोक्तं सर्वं मंक्षु शीघ्रं ॥ कौमोदकीत्यादि॥कौमोदकी गदा सरसिजं पद्मं अरि चक्रं दरः शंखः एतैः सुतरां युक्तैश्चतुर्भिर्हस्तैः च परं कौस्तुभकिरीटौ तदन्यानि विभूषणानि च तैः युनक्ति तत् युक् युक्तं दृष्ट्वा च ॥ अस्योत्तरश्लोकेऽन्वयः॥ ६८ ॥



मत्वेति भर्तुरिदमस्ति विचेष्टितं मे नो चेन्ममापि कथमत्र विमोहजालम् ॥ गर्वं विहाय तमखर्वमलं विलज्जो भूमौ पपात कनकोज्ज्वलयष्टिकेव ॥ ६९ ॥

मत्वेति ॥ अत्रेदं परिदृश्यमानं मे भर्तुः श्रीकृष्णस्य विचेष्टितमस्ति इति मत्वा॥एवं मननमेव व्यतिरेकेण द्रढयति ॥ नोचेदिति ॥ स्फुटं ॥ अलमत्यर्थं ॥ अखर्वं महांतं ॥ विलज्जो विगतलज्जो विशिष्टलज्जो वा ॥ श्लोकद्वयेऽपि वसंततिलका वृत्तं ॥ ६९ ॥

ग० ॥ तदात्वे विधिः प्रभो सागसि मयि त्वमप्येवंविधो भवेति कथयन्निव क्षमामवलंब्य भो विभो तव विभूम्ना मच्चातुर्यमप्यधरितमिति सूचयंश्चतसृभिर्मणिमयमुकुटकोटिभिर्मज्जननिदानयुगलमिदमिति संचिंत्य विमलं तच्चरणकमलयमलं समस्पृशत्॥ २१ ॥

तदात्वेइति॥तदात्वे तत्काले ॥ तत्कालस्तु तदात्वं स्यादित्यमरात् ॥ विधिर्ब्रह्मा चतसृभिर्मणिमयमुकुटकोटिभिर्विमलं तच्चरणकमलयमलं भगवच्चरणकमलयुग्मं समस्पृशत्॥चतुर्भिरपि शिरोभिस्तच्चरणौ ववंदइत्यर्थः ॥ अत्र फलमुत्प्रेक्षते॥ भोइत्यादि॥भो विभो तव विभूम्ना विशिष्टेनैश्वर्येण मच्चातुर्यमपि मम चातुर्यं वत्सहरणादिरूपं विचित्रसर्जनरूपं वा अथच चतुर्णां भावश्चातुर्यमिति व्युत्पत्त्या मुखसंबंधि चतुष्ट्वं वा तदप्यधरितं तिरस्कृतमिति सू-

चयन् सन् ॥ किंकृत्वा ॥ मम ये जनननिदाने जन्मकारणेकमले तयोर्युगलमिदमिति विचार्यैवेति गम्योत्प्रेक्षा ॥ मज्जन्मकारणत्वेन भगवत्प्रसादने एते एव साहाय्यं करिष्यतइति अथवा एकेन नाभिस्थितेनाहमुत्पादितः आभ्यामुभाभ्यामन्यो मत्सदृक्षउत्पादितश्चेन्मदैश्वर्यहानिरेव स्यादित्येवं विचार्यैवेति भावः॥ किंच॥ क्षमां पृथ्वीमवलंब्य ॥ दंडवद्भूमौ निपत्येत्यर्थः ॥ तदवलंबने कारणमुत्प्रेक्षते ॥ प्रभोइत्यादि ॥ हे प्रभो सागसि सापराधे मयि विषये त्वमप्येवंविधः क्षमावलंबी भवेति कथयन्निव ॥ अत्र क्षमाक्षांतिः ॥ लज्जया स्वमुखेनैवं वक्तुमसमर्थत्वादिति भावः ॥ २१ ॥

**अनंतरं॥युग्मं॥प०॥एकैकवत्सहरणेन कृतापराध**
**रोधाय सोऽधिगतसाध्वससिंधुपारः॥ राधावराय**
**हि वराय विधाय कैः कस्सम्यक्तया नतिसहस्रमहो**
**विनम्रः॥ ७० ॥**

अथ ब्रह्मा सहस्रवारं नत्वा स्तुत्वा तदनुज्ञया स्वलोकमगादित्याह॥ एकैकेत्यादियुग्मेन॥ अनंतरं स प्रसिद्धः कोब्रह्मा ॥को ब्रह्मणि समीरात्मयमदक्षेषु भास्करइति मेदिनीकोशात् ॥ हि यस्मात् ॥ अधिगतेति ॥ पूर्वोक्तचरणस्पर्शमाहात्म्येन प्राप्तभयसमुद्रपारः अतः कैः शिरोभिः ॥ सुखशीर्षजलेषु कमिति मेदिनीकोशात् ॥ एकेति ॥ एकैकवत्सहरणेन कृता ये अपराधास्तेषां रोधाय ॥ एकैकनमस्कारेण एकैकमपराधं निराकर्तुमित्यर्थः ॥ वराय श्रेष्ठाय राधावराय श्रीकृष्णाय सम्यक्तया अष्टांगसाहित्यरूपेण उत्तमप्रकारेण नतिसहस्रं विधाय विनम्रः सन् ॥ एतादृशभगवदपराध-



प्रयुक्तखेदसूचकमहो इति ॥ ७० ॥

**स्तुत्वा च चारुनलिनायतलोलदृष्टिं वृष्टिं कृपामृत**
**भरस्य विधातुमुत्कं॥ दध्योदनस्य कवलेन विशो**
**भिहस्तं लोकं ययौ निजमजस्तदनुज्ञया तं॥ ७१॥**

स्तुत्वेति ॥ चारुनलिनवदायता लोला चंचला शरणागतस्य स्ववत्सलत्वेन तदवलोकनविषये सतृष्णा वा दृष्टिर्लोचनं यस्य तं ॥ अतएव कृपामृतभरस्य वृष्टिं विधातुमुत्कमुत्कंठितं ॥ तथा ॥ दध्योदनस्य कवलेन विशेषेण शोभमानहस्तं तं श्रीकृष्णं स्तुत्वा अजो ब्रह्मा तदनुज्ञया भगवदनुज्ञया निजं लोकं ययौ गंतुमुद्यतोऽभूत् ॥ उभयत्र वसंततिलका वृत्तं ॥ ७१ ॥

**ग० ॥ ततः प्रयाणोन्मुखतया विहितत्रिःपरिक्र**
**मणे द्रुहिणे कृतप्रयाणे ऽनेकवत्सगणपरिपूरितपा**
**र्श्वप्रदेशो व्रजेशोद्भवो वयस्याऽर्भकोपकंठं सोत्कं**
**ठमढौकत॥ २२॥**

ततइति ॥ प्रयाणोन्मुखतया विहितं त्रिवारं परिक्रमणं प्रदक्षिणा येन तस्मिन्द्रुहिणे ब्रह्मदेवे कृतप्रयाणे सति॥ अनेकेत्यादि ॥ स्फुटं॥ सोत्कंठं चिरेण समागमादुत्कंठासहितं यथातथा अढौकत प्राप्तोऽभूत् ॥ २२ ॥

**प० ॥ मन्यमानैरब्दमितं त्रुटिमात्रमनेहसम् ॥ भू**
**र्यर्भकैरर्भकोऽसौ नंदस्याऽगात्स्वगोकुलम् ॥ ७२॥**

मन्यमानैरिति ॥ असौ नंदस्यार्भकः श्रीकृष्णः भूर्यर्भकैः सह स्व-

गोकुलमगात् ॥ कीदृशैः ॥ अब्दमितं वत्सरमितं अनेहसं कालं त्रुटिमात्रं सूक्ष्मैलायां त्रुटिः स्त्री स्यात्कालेऽल्पे संशयेऽपि चेत्यमरात् ह्रस्वाक्षरोच्चारणकालार्द्धपरिमितं मन्यमानैः ॥ ७२ ॥

**ग०॥अथ जातुचिद्विकर्तनतनयतरंगिणीप्रतीरमहामहीरुहसमूहप्रसवपरागधूसरपरिसरपवननर्तिततत्सलिलमध्यवर्तिभ्रमरावलिकलितवनजावलिगलितमरंदप्रस्तमरसीकरनिकरपरिमलिते विविधवनविहंगकुलकलकूजितश्रवणसुखदे वनप्रदेशे श्रीदामप्रभृतिपृथुकसहस्रैः सह सबलो व्रजराजसूनुररंस्त॥ २३॥**

अथ धेनुकासुरवधलीलां वर्णयन् प्रथमतः श्रीदामप्रभृतिगोपैःसह वने क्रीडनमाह ॥ अथेत्यादिना ॥ अथ जातुचिद्विकर्तनस्य सूर्यस्य तनया सा चाऽसौ तरंगिणी नदी यमुना ॥ पुंवत्कर्मधारयेत्यादिना पुंवद्भावः ॥ तस्यायप्रतीरं तटं तत्संबंधिनां महतां महीरुहाणां वृक्षाणां यः समूहस्तत्संबंधिनां प्रसवानां पुष्पाणां यः परागो रजस्तेन धूसरः परिसर आसमंताद्भागो यस्य तच्चतत्पवनेन वायुना नर्तितं तस्या यमुनायाः संबंधि सलिलं तन्मध्यवर्तिनी भ्रमरावल्या कलिता युक्ता या वनजावलिः कमलपंक्तिस्तस्या गलितो यो मरंदो मकरंदस्तस्य प्रस्तमरः सर्वतः प्रसारी यः सीकरनिकरो बिंदुसमूहस्तेन परिमलिते परिमलयुक्ते ॥ तथा ॥ विविधा अनेकप्रकारा ये वनविहंगा वनपक्षिणस्तेषां यत्कुलंसमूह





स्तस्य कलमव्यक्तमधुरं यत्कूजितं तेन कृत्वा श्रवणसुखदे कर्णसुखदातरि एवंविधे वनप्रदेशे श्रीदामप्रभृतयो ये पृथुका गोपबालकास्तेषां सहस्रैः सह बलरामसहितो व्रजराजसूनुःअरंस्त क्रीडतिस्म ॥ २३ ॥

**तदा ॥श्रीदामसुबलस्तोकप्रमुखास्सामोदास्तालफलामोदसमुदिततददनेच्छाः समुदिताः सबलं किल बलानुजमित्थमूचुः॥ २४॥**

अथ श्रीदामादयो गोपास्तालवनस्थतालफलभक्षणाभिलाषेण रामसहितं श्रीकृष्णं प्रति प्रोचुरित्याह ॥ तदेति ॥ तदा क्रीडासमये समुदिताः संघीभूताः श्रीदामसुबलस्तोकप्रमुखाः गोपालबालकाः सामोदाः सहर्षाः तथा तालफलानामामोदेन सौगंध्येन समुदिता उत्पन्ना तददनेच्छा तेषां फलानामदनेच्छा भक्षणेच्छा येषां तथाविधाश्च संतः सबलं बलरामसहितं बलानुजं कृष्णं प्रति इत्थं वक्ष्यमाणप्रकारेण ऊचुः किल ॥ २४ ॥

**प०॥तालालिफलजामोदलुब्धचित्ता वयं विभो॥
तस्मात्तानि प्रदातुं द्राक्प्रसीद सबलोऽसि यत्॥
॥ ७३॥**

यदूचुस्तदाह ॥ तालेति ॥ हे विभो वयं तालानां तालवृक्षाणां या आलिः पंक्तिस्तत्संबधिफलजन्यो य आमोदस्तेन लुब्धं चित्तं येषां ते तथाविधाः यतः स्मः ॥ तालालीत्यालिपदेन फलबाहुल्यबोधनाद्गोपबाहुल्येऽपि कलहशंकानिरासः ॥ आमोदेत्यादिना फलानां पक्वत्वेन भक्षणार्हत्वं च द्योत्यते ॥ तस्माद्धेतोः तानि

तालफलानि यतः सबलः बलेन बलरामेण शारीरसामर्थ्येन च सहितः असि ॥ अतो द्राक् झटिति दातुं प्रसीद ॥ ७३ ॥

**ग० ॥ तत् श्रुत्वा प्रोन्नततदभिलाषस्तत्प्रार्थितप्रपूर्तिप्रयत्नप्रणयिचेतास्तृणास्तरणमृदुतरपद्व्या तैर्निरंतरितपार्श्वभागस्सानुरागस्सरामेण सहप्रयाणाय प्रचक्रमे ॥ २५ ॥**

तदिति ॥ सः श्रीकृष्णः तत् श्रीदामप्रभृतिगोपवचनं श्रुत्वा रामेण सह प्रयाणाय अर्थात्तालवनं प्रति प्रयाणं कर्तुं ॥ तृणेति ॥ तृणान्येवाऽऽस्तरणानि तैर्मृदुतरया अतिशयितमृद्व्या पद्व्या प्रचक्रमे उपक्रांतवान् इत्यन्वयः ॥ कीदृशः सः ॥ प्रोन्नतेति ॥ प्रोन्नतोऽत्युच्चोऽतिशयित इतियावत् ॥ एवंविधः तालफलविषयोऽभिलाषो यस्य सः ॥ तथा ॥ तत्प्रार्थितेति ॥ श्रीदामादिप्रार्थितपूरणविषयकयत्नोन्मुखचित्तः ॥ तथा ॥ तैरिति ॥ श्रीदामादिभिः ॥ शेषं सुगमं ॥ २५ ॥

**प० ॥ तालांककृष्णवरगोपसुतैरिमानि भोज्यानि मा किल फलानि दृशाऽपि दुष्टाः ॥ ते संस्पृशंत्विति विमृश्य नभोगतैः स तालद्रुमैः स्थपुटितं वनमाविवेश ॥ ७४ ॥**

तालांकेति ॥ स श्रीकृष्णः नभोगतैराकाशगतैः अत्युच्चैरित्यर्थः ॥ तालद्रुमैः स्थपुटितं व्याप्तं वनं आविवेश ॥ तालानां नभोगमने उत्प्रेक्षते ॥ तालांकेत्यादि ॥ तालांको बलरामः कृष्णश्च तौ वरौ श्रेष्ठौ येषु एवं विधैर्गोपसुतैर्भोज्यानि इमानि फलानि दुष्टास्ते असुरादयो दृशाऽपि मा संस्पृशंत्विति विमृश्य किल ॥ गोपसुतैरित्यत्र गां पांतीति गोपास्तेषां सुतैरिति व्युत्पत्त्या स्वीयजन्मकारणभूतगोपदवाच्यपृथ्वीरक्षकत्वसंबंधाद्गोपभोज्यफलरक्षणे तालानामत्यादरः सूचितः ॥ अत्र तालांकपदेन यतो बलरामेण चिन्हितया ध्वजे ऽस्माकं धारणं कृतमतोऽस्मत्पक्षपातिनोऽस्याऽदनीयफलसंरक्षणमवश्यं विधेयमिति तालवृक्षाभिप्रायो व्यंजितः ॥ वसंततिलका वृत्तं ॥ ७४ ॥



**ग० ॥ तत्राऽतिप्रबलबहुलबाहुबलावलेपबलसुबलसुबाहुश्रीदामप्रमुखप्रकंपितप्रविशालतालतरुततिफलप्रपतनप्रोज्जृंभितस्वनश्रवणसंधुक्षितक्रोधधनंजयस्तदभिधानापराधविधानानुविद्धांतः करणः ॥ २६ ॥**

**प० ॥ क्ष्मां क्षोदयन् स्वैः क्षुरप्रैः खुराग्रैः क्ष्माभाववान् क्षिप्रमेष क्षुधार्तः ॥ तरक्षुः क्रुधा गर्दभोऽसाविवाऽन्वर्थयन्नामसोऽस्मिन्बलं प्राऽद्रवत्तं ॥ ७५ ॥**

अथ वनं गत्वा बलरामादिभिः फलपातने कृते तच्छब्दश्रवणानंतरं सक्रोधो धेनुकासुरो रामं प्रति प्राद्रवदित्याह ॥ तत्रेत्यादिगद्यसहितेन क्षितिमिति श्लोकेन ॥ तत्र श्रीदामादिभिर्बोधिते अस्मिंस्तालवने सः असौ परोक्षतया विप्रकृष्टोऽपि एषः तालफलपतनशब्दश्रवणेन समीपतरवर्ती ॥ इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम् ॥ अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादि-

ति वचनात्॥गर्दभस्तद्रूपो धेनुकासुरः क्रुधा क्रोधेन स्वाभिधानं अन्वर्थयन् तज्जातीयशब्दकरणादिना यथार्थं कुर्वन् ॥ शब्दार्थकगर्दधातुनिष्पन्नत्वाद्गर्दभशब्दस्य ॥ तं बलं बलरामं प्रति क्षिप्रं शीघ्रं प्राऽद्रवत् धावति स्मेत्यन्वयः ॥ कीदृशो गर्दभः ॥ अतिप्रबलेति ॥ अति अत्यंतं प्रबलः बहुलो बाहुबलविषयको ऽवलेपो गर्वो येषां तथाविधा बलरामसुबलसुबाहुश्रीदामप्रमुखा गोपास्तैः प्रकर्षेण कंपिता प्रविशाला या तालवृक्षाणां ततिः परंपरा तत्संबंधिफलानां प्रपतनेन प्रोज्जृंभितः प्रादुर्भवन् यः स्वनस्तस्य श्रवणेन संधुक्षितः प्रज्वलितः क्रोधरूपो धनंजयोऽग्निर्यस्य तादृशः ॥ तथा ॥ तदभिधानेति ॥ तस्य धनंजयस्य यदभिधानं धनंजय इति नाम तस्य यदपरार्धं जय इति तस्य यद्विधानं करणं तस्य यदनुसंधानं तेनाऽनुविद्धं व्याप्तं अंतःकरणं यस्यैवंविधः अतिजिगीषुरित्यर्थः॥ तथा ॥ क्षुरप्रैस्तत्सदृशैस्तीक्ष्णैः स्वैः स्वकीयैः खुराग्रैः क्ष्मां पृथ्वीं श्लेषेण क्षांतिं च क्षोदयन् विदारयन् ॥ अतएव ॥ क्षमेति ॥ क्षांतिरहितः ॥ कइव ॥ क्षुधार्तस्तरक्षुरिव मृगादनइव॥ तरक्षुस्तुमृगादनइत्यमरात् ॥ श्लोके भुजंगप्रयातं वृत्तं ॥ २६ ॥ ७५ ॥

**ग० ॥ किंच॥ खरतरखुरतलतक्षितचलक्षितितलं मामतिबलमवज्ञाय फलपातनप्रवृत्तस्य बलस्य कीदृशमतिकठिनं हृदयमिति परीक्षितुमिव तदुरःस्थले विमले लत्ताप्रहारमकृत॥ २७॥**

किंचेति ॥ गर्दभ इत्यत्राऽपि संबध्यते ॥ गर्दभः विमले तदुरःस्थले तस्य बलरामस्योरःस्थले वक्षःस्थले लत्ताप्रहारमकृतेत्यन्वयः ॥



उरःस्थल एव लत्ताप्रहारे कारणमुत्प्रेक्षते ॥ खरतरेत्यादिपरीक्षितुमिवेत्यंतेन॥अर्थान्मदीयैः खरतरैः कठोरतरैः खुरतलैस्तक्षितं चुर्णीकृतं चलत्खुरप्रहारेण चंचलं क्षितितलं भूतलं येनैवंविधं अतिबलं मामवज्ञाय फलपातनविषये प्रवृत्तस्य बलस्य बलरामस्य हृदयं अतिकठिनं कीदृशं इति परीक्षितुमिव ॥ तक्षितेत्यत्र तक्षू तनूकरणे इत्यस्य णिजंतस्य रूपं ॥ २७ ॥

**अथ॥ प० ॥ मन्मस्तकोद्भूषणभूतभूमिः खरैः खुराग्रैः खनिता खलेन ॥इतीव संचिंत्य चिरं बलेन बलेन पादे विधृतस्स दैत्यः॥ ७६॥**

मदिति ॥ अथ दैत्यः बलेन बलरामेण कर्त्रा बलेन सामर्थ्येन कृत्वा पादे चिरं विधृतः आसीत्॥अत्रोत्प्रेक्षते॥मदित्यादि॥ इवशब्दो भिन्नक्रमः संचिंत्येत्यनंतरं योज्यः॥शेषावस्थायां मन्मस्तकस्य उदुत्कृष्टं यद्भूषणं भावप्रधाननिर्देशाद्भूषणत्वं तत् भूतं प्राप्तं यस्या एवंभूता॥यद्वा भूषणंभूता जाता॥मयूरव्यंसकादित्वात्समासः॥एवंविधा या भूमिः सा खरैः कठिनैः खुराग्रैः कृत्वा खलेन धेनुकासुरेण खनिता इति संचिंत्येव॥पादेनैवापराधकरणान्मस्तकप्रहारस्याऽतिक्रोधहेतुत्वाच्च पादे एव धृत इति तात्पर्यं ॥ खनितेत्यत्र यद्यपि खनधातोरुदित्वेन क्त्वायां वेट्कत्वाद्यस्य विभाषेत्यनेन निष्ठायामिण्णिषेधः प्राप्नोति तथापि सेसिचीति वेट्कत्वादेव सिद्धे कृंतत्यादीनामीदित्वेन तस्याऽनित्यत्वाद्धावितमित्यादिवदिट्॥उपजातिर्वृत्तं॥ ७६ ॥

**समाऽपि तालास्तु खराशुगेन विद्धाः पुराऽनेन परीक्षणाय॥ रिपोर्जयस्येति विचार्य रामस्तं तादृ शं तेषु समुत्ससर्ज॥ ७७॥**

समेति॥रामःपुरा रामावतारे अनेन रामाभिख्येन श्रीकृष्णेन तु रिपोर्वालिनोजयस्य परिक्षणाय॥वालिजयविषये सुग्रीवकृतं स्वसामर्थ्यपरीक्षणमुद्दिश्येत्यर्थः ॥ समाऽपि तालाः खरस्तीक्ष्णो य आशुग एको बाणस्तेन विद्धा इति विचार्येवेति गम्योत्प्रेक्षा॥ स्वयमपि तादृशं खराशुगं अत्र पक्षे खरः क्रूरः खराकृतिर्वा एवंविधश्चाऽसावाशुगश्च शीघ्रगामी तथाविधं तं धेनुकं तेषु तालेषु सम्यगुत्ससर्ज ॥ एतेन खराशुगेन समतालभेदनानंतरं यथा सुग्रीवस्य रामे वालिहननसामर्थ्यनिश्चयो जात एवं स्वस्मिन्नपि एतत्तालभेदनोत्तरमेतत्सदृक्षान्यासुरहननसामर्थ्यनिश्चयमन्यान्प्रति कारितवानिति सूचितं ॥ उपजातिर्वृत्तं ॥ ७७ ॥

**क्षितिधरपवनाशनवर इति तं मत्वा भियेव तत्याज ॥ प्राणपवनसमुदायः क्रोष्टुशरीरं स रौहिणेयं द्राक्॥ ७८॥**

क्षितिधरेति ॥ हि यतः स धेनुकासुरसंबंधी प्राणपवनसमुदायः भियेव बलरामभयेनेव द्राक् झटिति क्रोष्टुशरीरं गर्दभाकृतिधेनुकशरीरं ॥ क्रोष्टुशब्दस्य गर्दभवाचकत्वमेतत्प्रकरणे श्रीभागवते प्रसिद्धं ॥ तत्याज ॥ भये हेतुमाह ॥ क्षितीत्यादि ॥ तं रौहिणेयं बलरामं क्षितिधरपवनाशनवर इति क्षितिधरः पृथ्वीधरः पवनं वायुमश्नंति ते पवनाशनाः सर्पास्तेषां मध्ये वरः श्रेष्ठ इति मत्वा॥



तस्य शेषावतारत्वात्॥पूर्वं खरस्य पृथ्वीविदारणकर्तृत्वात्तत्प्राणानां पवनरूपत्वाच्च बलरामगतक्षमाधारत्वपवनाशनवरत्वयोर्मननं भयहेतुरिति भावः ॥ ७८ ॥

**ग० ॥ अनंतरं त्वंतरिक्षान्निरंतरं क्रोष्टुकुणपसंपर्कदूषितविग्रहाणां समग्रगोपांगजानां विशुद्धिं विधातुमिव यातुवैरिणस्स्वःसुपर्वशैवलिनीसुसलिलसंसिक्तसुललितशाखिसंचितानि सुवासांचितानि सुमानि शयेभ्यस्समुदसृजन्॥ २८ ॥**

अनंतरमिति ॥ अनंतरं धेनुकहननानंतरं यातुवैरिणः यातूनां नैर्ऋतो यातुरक्षसी इत्यमरात् राक्षसानां वैरिणो देवाः अंतरिक्षादाकाशमधिष्ठाय ॥ ल्यपूलोपे पंचमी ॥ शयेभ्यो निजहस्तेभ्यः सुमानि पुष्पाणि निरंतरं अविच्छिन्नं यथातथा समुदसृजन् तत्यजुः ॥ अत्रोत्प्रेक्षते ॥ क्रोष्ट्वित्यादिविधातुमित्यंतेन ॥ क्रोष्टोर्धेनुकासुरस्य यः कुणपः शवं ॥ कुणपः शवमस्त्रियामित्यमरः ॥ तत्संपर्केण संसर्गेण दूषिता विग्रहा देहा येषां तेषां समग्रगोपशिशूनां विशुद्धिं विधातुमिव ॥ कुसुमेषु शुद्धिकरणसामर्थ्यहेतुगर्भं तद्विशेषणमाह ॥ स्वरित्यादि ॥ स्वःसुपर्वशैवलिनी स्वर्गंगा मंदाकिनी तत्संबंध्युदकसिक्ताऽतिरम्यकल्पवृक्षेभ्यः संगृहीतानि ॥ एतेन गंगोदकानुषक्तत्वात्पवित्रीकरणसामर्थ्यं सूचितं ॥ तथा ॥ स्विति॥ सुवासेन सौगंध्येन युक्तानि ॥ अनेन पिशिताशनकुणपदौर्गंध्यनिरासकत्वं सूचितं ॥ २८ ॥

प० ॥ भुक्त्वा फलानि विमलानि सुखं च गोपैरा
त्रिंचरप्रतिभटप्रविनाशजातम् ॥ कृत्वा वनं तद
खिलं किल भोगयोग्यं वृंदावनं प्रति ययौ सबल
स्स शौरिः ॥ ७९ ॥

भुक्त्वेति ॥ सबलः सः शौरिः श्रीकृष्णः गोपैः सह फलानि रात्रि-
चरा राक्षसास्तद्रूपा येप्रतिभटाः शत्रवस्तेषां प्रकृष्टविनाशेन जा-
तं सुखं च भुक्त्वा तदखिलं वनं तालवनं भोगयोग्यं कृत्वेत्यादि
स्फुटं॥ सबलशौरिपदाभ्यां वैरिहननसौकर्यं सूचितं ॥ लोके बल-
विशिष्टस्य शूरापत्यस्य तथा प्रसिद्धत्वात् ॥ वसंततिलका वृत्तं ॥
॥ ७९ ॥

अथच ॥ लक्ष्मीसत्सहजा मुदाऽब्धिजनिताः प्रायो
मया स्वीकृतास्तत्रैकाऽतिशयप्रसिद्धमहिमा सा
कामधेनुः पुनः ॥ स्मृत्वा तत्प्रणयप्रकोपभरतो भी
तो हरिर्गोकुले गोशुश्रुषणतत्परः समभवन्नांगीकृ
तेत्यादरात् ॥ ८० ॥

लक्ष्मीति ॥ अथच हरिर्गोकुले आदराद्गोशुश्रूषणतत्परः समभवत्॥
अत्रोत्प्रेक्षते ॥ अब्धिजनिताः समुद्रोत्पादिताः लक्ष्म्याः संत उत्कृ-
ष्टा ये सहजाः कौस्तुभादयः ॥ आदिशब्देन नेत्ररूपतया चंद्राद-
यो गृह्यंते ॥ सत्पदेन सुरा विषयोर्व्याप्तिः ॥ प्रायो बाहुल्येन ॥
अनेन ऐरावतादीनां केषांचिदनंगीकारेऽपि न क्षतिः ॥ मया स्वी-





कृताः परंतु तत्र तेषु मध्ये अतिशयप्रसिद्धमहिमा एका सा का-
मधेनुर्नांगीकृतेति स्मृत्वा ॥ तत्प्रणयेति ॥ तस्या लक्ष्म्या यः प्रण-
यप्रकोपभरस्तस्मादिति ततो भीतइवेति गम्योत्प्रेक्षा ॥ शार्दूलवि-
क्रीडितं वृत्तं ॥ ८० ॥

ग० ॥ तदनंतरमसौ विविधवनविहारविश्रृंखल
विजृंभितकुतूहलिना हलिना महाबलिना बलदे
वेन सहाऽऽसादितगोष्ठांगणद्वारस्तद्गुणवर्णानुरूपा
मात्मजां दातुमिव भाविजामातुस्सुषमां मातुमं
बरतलं विहायाऽऽगतेन भगवता भासांनिधिने
व मणिगणप्रचुरेण ज्वलत्कांतिचामीकरनीराज
नपात्रेणोपदीकर्तुं तेनैवाऽऽनीतेन निजरत्नसमुदा
येनेव दीपांकुरसमुच्चयेन द्विगुणिततेजोविशेषेण
तेन तैजसद्वयेन त्वद्गतदिवसविरहभरतापं सूचयं
त्या प्रवृद्धप्रेमप्रपूरप्रपंचप्रसंगेन पयोधरद्वयादि
व नेत्रपयोजद्वयादपि पयःपूरं परित्यजंत्याऽत्यु
त्पुलकांग्या मात्रा यशोदया कृतनीराजनो व्रज
जनतामोददस्स्वस्वस्थाननिवेशितगोधनस्तज्जन्म
समयपयोदानुषंगेण संप्राप्तं कालिमानं दुग्धे
न परिहर्तुं समागतेन धृतशांतवेषेण शेषेणेव दो
ष्णा कृतधेनुसेवनो व्रजावनो बंधुत्वेन कनकेंद्रद्द

षत्सिंहासनवस्थतपनबिंबे स्वस्मिन्निव निजोत्प त्तिकारणजातं शीतलिमानं विधातुं विहितप्रयासस्य सुंदरपयोभवयुग्मस्य शंकामुद्भावयन् ऊरुयुगलमध्यवर्तितपनीयदोहनपात्रआरब्धदोहनत्रिलोकीमोहनः पात्रतलदोहधाराघातरवमिश्रित गोपीगृहीतवत्सलेहनचलद्ग्रीवाघंटाभरणरणित सहवर्तिमहाककुत्कलितपृष्ठदेशदृढमहोक्षपरिवृढ गर्जितनिरंतरितकाष्ठाऽवकाशो व्रजयुवतिधृताशोविरजस्कीकृतांगो जननीसमर्पितसपायससुरसस्वन्नैरवसायितसायंतनाशनकृत्यो व्रजे स्वल्पशशिकल्पतल्पप्रसूनपरिमलपरिमलितनिकुंजसदने कृष्णो विहारं विरचय्य सुखेन सुष्वाप॥२९॥

तदनंतरमिति गद्यस्य काशीस्थैः काकारामाभिधैः पंडितैर्मदीयपरमगुरुभिर्यत् व्याख्यानं कृतं तदेव लिख्यते ॥ सायमारभ्य प्रभातपर्यंतं भगवत्कृत्यं वर्णयति ॥ तदनंतरमितिगद्येन ॥ तत्पदेन तालवनशुद्धिर्गृह्यते॥असौ नंदनंदनः विविधवनविहारेण विश्रृंखलमसंकुचितं यथा भवति तथा विजृंभितानि प्रकटीकृतानि यानि कुतूहलानि कौतुकानि अस्य संति तथा विधेन हलिना॥एकस्योपलक्षणत्वात्संनिहितहलमुसलकेनेत्यर्थः॥अतएव महाबलिना बलदेवेन सह आसादितं प्राप्तं गोष्ठांगणस्य द्वारं येन स तथाभूतो नंदनंदनः मात्रा यशोदया कृतनीराजन इति संबंधः ॥ नीराजने क-



रणं मणिगणप्रचुरं ज्वलत्कांति च स्वर्णनीराजनपात्रं तन्निहितो दीपसमुच्चयश्च ॥ तत्र नीराजनपात्रस्य विशेषणं भासांनिधिः सूर्यः पात्रतादात्म्येन संभावितः ॥ ननु सूर्यागमनस्य कथं संभावनमित्याकांक्षायां सूर्यविशेषणं ॥ तद्गुणेत्यादि ॥ तस्य नंदनंदनस्य गुणैर्ज्ञानादिभिर्वर्णेन श्यामेन च अनुरूपां तुल्यप्रायां आत्मजां कालिंदीं दातुं ॥ तस्याः स्वयंवरत्वादिव शब्दप्रयोगः ॥ भाविनो भविष्यतो जामातुः सुषमां परमशोभां मातुमवधारयितुं अंबरतलं विहायाऽऽगतेन अंबरादवतीर्णेनेत्यर्थः ॥ तस्य परिमितरूपधारणे सामर्थ्यं सूचयति ॥ भगवतेति ॥ नीराजने द्वितीयं करणं दीपसमुच्चयं विशिनष्टि ॥ उपदीकर्तुमिति ॥ उपदाउपायनं तद्भावापन्नं कर्तुं तेन सूर्येणैवाऽऽनीतेन निजरत्नं सूर्यकांतो माणिक्यं वा तत्समुदायरूपेणेवेत्यर्थः ॥ पुनः कीदृशेन दीपांकुरसमुच्चयेन ॥ द्विगुणिततेजोविशेषेण द्विगुणितः प्रतिबिंबग्राहिरत्नसंनिधानेन द्वैगुण्यरूपातिशयं नीतस्तेजोविशेषो यस्य स तथा तेनेत्यर्थः ॥ अथ मातुर्विशेषणत्रयं तत्र प्रथमं तेनेत्यादि सूचयंत्येत्यंतं ॥ तेन चामीकरपात्रदीपसमुच्चयरूपेण तैजसद्वयेन करधृतेन दिवसपर्यंतं विरहभरतापं बाह्याभ्यंतरभेदाभिन्नं सूचयंत्या ॥ पुनःकीदृश्या ॥ प्रवृद्धप्रेमेति ॥ प्रेमातिशयेन स्तनाभ्यामिव नेत्राभ्यामपि पयःपूरं परित्यजंत्या ॥ तत्र नेत्राभ्यां जलपूरं स्तनाभ्यां दुग्धपूरं प्रकटीकुर्वत्येत्यर्थः ॥ पुनःकीदृश्या ॥ अतिशयितेनोत्कृष्टेन च पुलकेन युक्तमंगं यस्याः सा तथा तया ॥ एतेन विवाहादिकर्मसु द्वारे नीराजनं कुर्वंतो लोका अनुसृता भवंतीति सूचितं ॥ वस्तुतस्तु पुष्टिमार्गानुरोधेन संध्यारार्तिकवर्णनमेतत् ॥ तदुत्तरभावि-

कृत्यमाह ॥ व्रजेति ॥ व्रजनिष्ठजनसमूहस्य मोददः अतएव स्वस्वस्थानं तत्तद्गृहं तत्र निवेशितं गोधनं येन स तथा ॥ न केवलं तत्र स्थापनमात्रं कृतं किंतु कंडूयनमपीत्युच्यते ॥ दोष्णा कृतधेनुसेवन इति ॥ एकेन भुजेनाऽपरिमितगोधनस्य कंडूयनमशक्यमिति शंकां वारयितुं तत्र शेषाभेदमुत्प्रेक्षते ॥ शेषेणेवेति ॥ शेषाद्गोगोपानां भयप्रसक्तिं वारयति ॥ धृतशांतवेषेणेति ॥ तत्र शेषस्यागमनं प्रयोजनवशेन संभावयन् शेषं विशिनष्टि ॥ तज्जन्मेति ॥ तत्पदेन नंदनंदनः जन्मपदेन तदुत्तरं पितृशिरोधिरूढतया गमनं लक्ष्यते ॥ तत्काले शेषोऽन्वगाद्वारि निवारयन्फणैरिति शास्त्रसिद्धो यः पयोदस्य मेघस्याऽनुषंगः संबंधस्तेन पूर्वोत्पन्नोयः कालिमा श्यामता तं दुग्धप्रसंगेन परिहर्तुं समागतेन ॥ दृश्यते हि बलेन दोहने दुग्धकणानां भुजेपतनं ॥ नन्वेतावान्विक्षेपो भगवता किमर्थं धार्यतेऽत आह ॥ व्रजावनइति ॥ व्रजवासिनां श्रीकृष्णप्रेमसमाधिमग्नानां गृहकृत्यं भूतावेशन्यायेन प्रविश्य श्रीकृष्ण एव करोति किमु बाह्यकृत्यं ॥ तदुक्तं प्रेमभागखंडग्रंथे तत्साधकमागमवचनंच ॥ नित्यमेव निमग्नास्ताः कृष्णप्रेमसमाधिषु ॥ न कदाऽपि वियुज्यंते गोप्यो विरहभीरवइति ॥ तथाच गृहकृत्यादिचिंतापिशाचीतो व्रजं रक्षन् व्रजावन इत्युच्यते ॥ भगवतस्त्वपरिमितब्रह्मांडनिर्वाहकस्य नाऽत्र श्रमलेशोऽपीति भावः ॥ अथ दोहनलीलामाह ॥ बंधुत्वेनेत्यादिनावकाश इत्यंतेन ॥ पुनः कीदृशो नंदनंदनः ॥ पीतांबरवेष्टितोरुयुगलमध्यनिवेशितं यत्तपनीयमयं दोहनपात्रं तस्मिन्नारब्धं दोहनं येन स तथा ॥ तत्र गम्योत्प्रेक्षा ॥ दोहनपात्र-



मेव भास्वरत्वात् सूर्यस्तस्मै समागताय बंधवे श्वशुराय आसनं देयमिति कनकवेष्टितेंद्रनीलशिलाद्वयरूपमासनंदत्तमिति ॥ ननु तपनस्य तापकत्वं केन परिहृतमित्याकांक्षायां स्वकारणलब्धशैत्यककमलाभ्यां हस्ततादात्म्येनोत्प्रेक्षिताभ्यामिति दर्शयति॥ बंधुत्वेनेति ॥ कनकेंद्रनीलसिंहासनस्थे तपनबिंबे॥स्वपदेन कमलयुगलं गृह्यते ॥ स्वोत्पत्तिकारणं जलं ततो लब्धं शैत्यं स्वसंयोगद्वारा आधातुं विहितः प्रयासो येन तथाभूतस्य पयोभवयुगलस्य कमलयुगलस्य शंकां उत्प्रेक्षां उद्भावयन् जनयन् ॥ पुनःकीदृशः ॥ त्रिलोकीमोहनः वक्ष्यमाणत्रिविधध्वन्युत्पादनेन लोकत्रयस्य मोहनः आनंदमूर्छाजनकः ॥ तत्र त्रयो ध्वनयो जनितास्तेष्वेको दुग्धधारापात्रसंयोगजः द्वितीयश्चलद्गोगलगतघंटादिजन्यः तृतीयो वृषभगर्जनजन्यः तत्र प्रथमेन भूलोकमोहनमुक्तं ॥ पात्रेति॥ पात्रतलस्य यो दोहधाराभिः कर्मव्युत्पत्त्या दुग्धधाराभिर्घातः अभिघाताख्यसंयोगस्तज्जन्यो यो रवस्तं श्रुत्वा मिश्रिता आहूता इव गोप्यः ॥ एतेन पृथ्वीलोकवासिजनमोहनं स्पष्टं ॥ ताभिर्मोहिताभिर्गृहीता ये परकीया अपि वत्सास्तेषां लेहनेन चलंति यानि ग्रीवास्थितानि घंटाद्याभरणानि तेभ्य उत्थितं यद्रणितं ॥ तेनाऽतरिक्षलोकमोहनं सूचितं ॥ अथपातालमोहकं वृषशब्दं दर्शयति ॥ सहेत्यादिना ॥ उक्तद्विविधशब्दस्य सहवर्ति यन्महोक्षपरिवृढगर्जितं ॥ महोक्षा हि प्रायेणाऽधोमुखा गर्जंति ॥ तेन पातालमोहनमूह्यं ॥ महोक्षाणां समासांतर्गतं विशेषणं महाककुद्भिः कलिता भूषिताः पृष्ठदेशा येषां तत्वं दृढत्वंच स्थूलत्वे सति बलत्वं ॥ एवंविधशब्दत्रयेण निरंतरितः पूरितः काष्ठानां दिशामव-

काशो येन स तथा ॥ मोहितव्रजयुवतिभिर्धृता रमणाशा यस्मिन् स तथा ॥ तदनंतरं सुगंधिद्रव्यैर्मात्रा विरजस्कीकृतानि धौतान्यंगानि यस्य स तथा ॥ ततो जननीसमर्पितानि सपायसानि सुरसानि शोभनानि च यान्यन्नानि तैरवसायितं समापितं सायंतनं सायंकालीनं अशनकृत्यं येन स तथा ॥ ततो व्रजे ॥ अस्वल्पेति॥ अस्वल्पानि बहूनि शशिकल्पानि शशिसदृशानि अतिशुभ्राणि आनंदजनकानीति यावत् ॥ एवंविधानि यानि तल्पसंबंधिप्रसूनानि तेषां परिमलेन परिमलिते परिमलयुक्ते निकुंजसदने विहारं विरचय्य सुखेन सुष्वाप ॥ लीलाग्रंथो भगवतः कृतो यो बुधजीवनैः ॥ तदेकदेशमास्वाद्य वयं मोदं परं गताः ॥ २९ ॥ एतत्पर्यंतं मम परमगुरूणां व्याख्यानं ॥

**प० ॥ कदाचित्कालिंद्यास्तटभुवि निदाघातपभरैः पराभूता गोपास्तृडुदयसमाक्रांतहृदयाः ॥ पपुर्गावस्तस्यास्सलिलमथ दुष्टं फणिविषैस्तदा पेतुः पृथ्व्यां व्यसवइव ते द्राक् समुदिताः ॥ ८१ ॥**

अथ कालियमर्दनलीलां प्रस्तौति ॥ कदाचिदिति ॥ अथ कदाचित् कालिंद्यास्तटभुवि निदाघस्य ग्रीष्मस्य संबंधिभिरातपभरैः पराभूता गोपा गावश्च तृडुदयेन पिपासाप्रादुर्भावेण सम्यगाक्रांतं व्याप्तं हृदयं येषां ते तथाविधाः संतस्तस्या यमुनायाः फणिनः कालियस्य विषैर्दुष्टं दोषयुक्तं सलिलमुदकं पपुः ॥ तदा पानसमकालमेव द्राक् झटिति समुदिताः संघीभूताः संतः व्यसवइव विषपानजन्यमूर्छया गतप्राणा इव पेतुः ॥ शिखरिणी वृत्तं॥ ८१॥



**ग० ॥ इत्थं विषधरविषविषक्तवर्ष्मण एतानमृतेक्षणेन तत्क्षणं समुत्थाप्य कलानिधिकुलावतंसः कालिंदीकीलालकलंककारिणं कालियं किला कलयन् ॥ ३० ॥**

इत्थमिति ॥ कलानिधेश्चंद्रस्य यत्कुलं वंशस्तस्याऽवतंसइव तत्कुलशिरोभूषणभूतः॥इदं विशेषणं वक्ष्यमाणे दृष्टावमृतरूपत्वे हेतुगर्भं बोध्यं ॥ चंद्रस्य सुधानिधित्वात् ॥ श्रीकृष्णः इत्थं पूर्वोक्तप्रकारेण ॥ विषेति ॥ विषधरस्य कालियस्य यद्विषं तेन विषक्तानि संबद्धानि व्याप्तानीति यावत् ॥ वर्ष्माणि शरीराणि येषां ते तथाविधांस्तानेतान् विषपानेन मूर्च्छां प्राप्तान् गोगोपान् तत्क्षणं तस्मिन्नेव क्षणे अमृतेक्षणेन अमृतरूपया दृशा समुत्थाप्य कालियं एतन्नामानं सर्पविशेषं॥ कालिंदीति ॥ कालिंद्या यत्कीलालमुदकं पयः कीलालममृतमित्युदकपर्यायेष्वमरात् तस्य कलंककारिणं दुष्टत्वजनकं आकलयन् किल॥ अस्योत्तरत्राऽन्वयः ॥ ३० ॥

**प० ॥ दर्वीकरमहामर्षखर्वीकरणलालसः॥ कदंबमारुरोहाऽऽशु सदंबाभूः खगेनगः॥ ८२ ॥**

दर्वीकरेति॥खगेनगः खगानां पक्षिणामिनः स्वामी गरुडस्तेन गच्छतीति खगेनगः श्रीकृष्णः अतएव॥दर्वीकरेति॥दर्वीकरः कालियाख्यः सर्पः॥दर्वीकरो दीर्घपृष्ठ इति सर्पपर्यायेष्वमरः ॥ तस्य यो महामर्षस्तस्य खर्वीकरणे ह्रस्वीकरणे नाशने इति यावत् लालसा औत्सुक्यं यस्यसः ॥ खर्वो ह्रस्वश्च वामनइत्यमरः ॥ लालसौत्सुक्य-

तृष्णातिरेकयाज्ञासु च द्वयोरिति मेदिनी ॥ स्वयं सदंबाभूः सती पतिव्रता या अंबा माता तस्याः भवतीति तथाविधोऽपि कदंबं कदंबवृक्षं श्लेषेण कडुते कर्कशा भवतीति कद् कुत्सितेत्यर्थः ॥ कडुकार्कश्ये इत्यस्य दोपधस्य किबंतं ॥ एवंविधा अंबा माता यस्यैवंविधं आरुरोह ॥ कदंबश्च कुमातृक इति हारावली॥८२॥

**ग० ॥ तदा तस्मात्प्रपतनप्रक्षुब्धनिजजलप्रवाहप्रोड्डीयमानाखंडडिंडीराडंबरधवलतया तच्चरणनिःसृताऽपरसहचर्यनुकार्युष्णघृष्टितनुजतरंगिणीतरलतरतरंगपरंपराविदिततत्प्रवेशः कृष्णाहीशस्तत्कृष्णताऽसहिष्णुतया स धृष्णुस्तच्चूषणायेव तद्विग्रहमावेष्टयत्॥ ३१॥**

तदेति ॥ तस्मात्कदंबात्॥तत्प्रपतनेत्यादि ॥ तस्य श्रीकृष्णस्य यत्प्रकृष्टं सोत्साहं पतनं अतएव तेन प्रक्षुब्धो यो निजजलप्रवाहस्तस्मात्प्रोड्डीयमान उपर्युच्छलन् अखंडो निरंतरो यो डिंडीरस्य फेनस्य आडंबरोऽतिशयस्तेन या धवलता शुभ्रता तया॥तदित्यादि॥तस्य भगवतश्चरणात् निःसृता अपराऽन्या या सहचरी भागीरथी तामनुकरोतीत्येवंशीला या उष्णघृष्टेः सूर्यस्य तनुजा तरंगिणी यमुना तस्यास्तरलतरा अतिचंचला या तरंगपरंपरा तया कृत्वा विदितो ज्ञातस्तत्प्रवेशः कृष्णप्रवेशो येनैवंविधः ॥ धृष्णुर्धृष्टः॥ धृष्टे धृष्णुर्वियातश्चेत्यमरात् ॥ कृष्णाहीनां कृष्णसर्पाणामीशः ॥ यद्वा कृष्णः कृष्णवर्णो ऽहीशः एवंविधः स कालियः अतएव तत्कृष्णता-





सहिष्णुतया तस्य श्रीकृष्णस्य या कृष्णता कृष्णवर्णस्तदसहिष्णुतया तदसहनेन तच्चूषणायेव तस्य कृष्णत्वस्य चूषणाय पानाय नाशायेवेति यावत् ॥ तद्विग्रहं श्रीकृष्णदेहं आवेष्टयत् वेष्टयतिस्म॥ ३१॥

**प० ॥ नानाडिंबानाविलोक्यागतांस्तानत्यार्तान्वै सन्निरीक्ष्याऽऽशुडिंभः ॥ नंदस्याऽसौ सर्पबंधाद्विमुक्तं कर्तुं देहं वृद्धिमागाद्विपत्रः॥ ८३॥**

नानेति ॥ विपत्रः विः पक्षी गरुडः पत्रं वाहनं यस्य सः वीन् पक्षिणः पातीति विपो गरुडस्तं त्रायत इति वा विपत्रो गरुडवाहनोऽपि ॥ पत्रं वाहनपक्षयोरित्यमरात्॥ असौ नंदस्य डिंभो बालकः श्रीकृष्णः ॥ पोतः पाकोऽर्भको डिंभइत्यमरः ॥ देहं स्वशरीरं सर्पबंधाद्विमुक्तं कर्तुं वृद्धिमागात् ॥ गरुडवाहनत्वेऽपि सर्पबंधमोचनार्थं स्वदेहवृद्धिकरणेन शत्रुनाशने स्वस्येतराऽनपेक्षत्वमायासाभावश्च, सूचितः ॥ किंकृत्वा ॥ नानेत्यादि ॥ नाना अनेकविधा ये डिंबा उपद्रवाः डिंबे डमरविप्लवावित्यमरात् तानाविलोक्याऽऽगतांस्तान्नंदादीनतिशयेनाऽऽर्तान् दुःखितान् सम्यक् सकरुणं निरीक्ष्य ॥ शालिनी वृत्तं ॥ ८३ ॥

**ग० ॥ तत्क्षणमसावत्येधमानतद्विग्रहत्रुट्यमानतत्तनुत्रायमाणभोगस्तं विहायाऽतिशायितनिर्मलां तद्वर्ष्मद्युतिमतिमलिनामारचयितुमिव फणाशतसमुत्सर्पद्विषकलुषफूत्कारांस्तदुपरि परिससर्ज॥ ॥३२॥**

तत्क्षणमिति ॥ तत्क्षणं वृद्धिसमये असौ कालियः ॥ अतीति ॥

अति अत्यंतमेधमानो वृद्धिं गतो यस्तद्विग्रहः कृष्णदेहस्तेन भुज्य-
मानः एवंविधस्तस्य श्रीकृष्णस्य तनुत्रायमाणः तनुत्रं वर्म दंश-
नमित्यमरात् तनुत्रं कवचं तद्वदाचरन् ॥ कर्तुः क्यङ् सलोपश्चेति
क्यङ् ॥ कवचीभवन्भोगो देहो यस्यैवंभूतः सन् ॥ भोगः सुखे
स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः ॥ श्रीकृष्णं विहाय मुक्त्वा
तदुपरि कृष्णोपरि ॥ फणाशतेति॥ फणाशतात्सम्यगुत्सर्पतो विषक
लुषाः विषदूषिता ये फूत्कारास्तान् परितः ससर्ज तत्याज ॥ अ-
त्रोत्प्रेक्षते ॥ अतिशयितेत्यादिइवेत्यंतेन ॥ अत्यंतनिर्मलां श्रीकृष्ण-
देहद्युतिमतिमलिनां कर्तुमिव ॥ अपकारांतरकरणेऽसमर्थः संस्तद्दे-
हकांतिमेव विषफूत्कारैर्मलिनां कर्तुमारब्धवानितिभावः ॥ अति-
निर्मलदर्पणादौ फूत्कारादिना मालिन्यं भवतीति प्रसिद्धं ॥ ३२ ॥

**तदानीं महामर्षसर्पाखर्वगर्वपर्वतपाटनायनर्त
नपटुर्मणिमयमृदुलोच्चफणाशतरंगमेदिनीमाशु
समारुरोह॥ ३३॥**

तदानीमिति॥तदानीं फूत्कारसर्जनानंतरसमये महानतिशयितोऽम-
र्षोऽसहनं यस्यैवंविधो यः सर्पः कालियस्तस्य अखर्वो महत्तरो यो
गर्वस्स एव पर्वतस्तस्य पाटनाय पाटनं विदारणं कर्तुं नर्तनपटुतर-
एव॥मणिमयेति॥मणिमयी मणिप्रचुरा मृदुला उच्चफणाशतरूपा
या रंगमेदिनी नृत्यस्थानं तां॥अनेन नृत्ययोग्यता सूचिता॥आशु
सम्यगारुरोह ॥ ३३॥

**प०॥नानानर्तनचातुरीं नटवरस्संदर्शयन् मोद
तश्चंचच्चारुमहार्हनूपुररवं विस्तारयँस्तत्क्षणं॥विद्यु**



**द्वेष्टितमेघकांतिममितां मुष्णन् स पीतांबरस्सांद्रा
नंदकरो ननर्त विबुधैः संस्तूयमानस्तदा॥ ८४ ॥**

अथाऽनेकविधनर्तनचातुर्यप्रदर्शनपूर्वकं तत्फणामंडले ननर्तेत्या-
ह ॥ नानेति ॥ नटवरः नटेषु वरः श्रेष्ठः अतएव मोदतो हर्षेण
नानानर्तनचातुरीं संदर्शयन् ॥ एतेन भयराहित्यमनायासश्च सू-
चितः॥चातुरीमेवाह विशेषणैः ॥ तत्क्षणं तस्मिन्क्षणे ॥ चंचदिति॥
चंचती देदीप्यमाने चारुणी रुचिरे महार्हे अमूल्ये ये नूपुरे मं-
जीरौ तयो रवं विस्तारयन् पीतांबरोऽतएवाऽमितां विद्युद्वेष्टितमे-
घकांतिं मुष्णन् ॥ लौकिकरीत्यैवंविधोऽप्यलौकिकरीत्या सांद्रा
नंदकरः सांद्रो दुःखासंभिन्नत्वेन निविडो य आनंदस्तत्करः अ-
तएव तदा विबुधैर्देवैः पंडितैश्च स्तूयमानः सः श्रीकृष्णो ननर्त ॥
शार्दूलविक्रीडितं वृत्तं ॥ ८४ ॥

**नृत्यं कर्तुं सूद्यतं तं निरीक्ष्य गंधर्वाद्यैर्गायकैरंत
रिक्षात्॥नानावाद्यैर्वर्धिता नर्तनेच्छा देवाश्चक्रुः
पुष्पवृष्टिं तदानीं॥ ८५ ॥**

नृत्यंकर्तुमिति ॥ गंधर्वाद्यैर्गायकैस्तं भगवंतं नृत्यं कर्तुं सुष्ठूद्यतं
निरीक्ष्य अंतरिक्षादंतरिक्षे स्थित्वा ॥ ल्यब्लोपे पंचमी ॥ नाना-
वाद्यैः करणैर्नर्तनेच्छा वर्धिता ॥ तदानीं नर्तनकाले देवाश्च पुष्प-
वृष्टिं चक्रुः ॥ लोके हि निपुणवादकसहकारे नर्तकादीनां नर्तना-
दीच्छाऽऽधिक्यं वादकानां च तादृशनर्तकादिसहकारे वादनेच्छा-
धिक्यं च प्रसिद्धतरं ॥ शालिनी वृत्तं ॥ ८५ ॥

**ग० ॥ ईदृङ्नर्तनप्रवर्त्तनश्रमरक्तचरणतामरसद्यु**

तिगर्भितनखमणिश्रेणिकांतिसहचरणनिपुणफ
णामणिकिरणधोरणीशोणायमानशिथिलतरस
मग्रविग्रहोऽत्युग्रः फणाभृदग्रेसरोऽहं बहिरिवांतरं
गेऽपि रक्त इति कृपावर्षणनिपुणाय कृष्णाय सू
चयन् किल वदनबिलात् कीलालझरं परं चच्छ
र्द॥ ३४॥

ईदृगिति ॥ फणाभृदग्रेसरः फणाभृतां सर्पाणामग्रेसरः श्रेष्ठः कालियः वदनबिलात्परं अत्यंतं कीलालझरं रुधिरप्रवाहं ॥ शोणितेऽभसिकीलालमित्यमरः ॥ चच्छर्द वमतिस्म ॥ कीदृशः फणाभृदग्रेसरः ॥ ईदृगिति ॥ ईदृक् पूर्वोक्तरीतिकं यन्नर्तनप्रवर्तनं तेन यः श्रमस्तेन रक्ते अत्यंतमरुणे ये तस्य श्रीकृष्णस्य चरणतामरसे चरणकमले तयोर्या द्युतिस्तया गर्भिता युक्तेति यावत् ॥ नखरूपाणां मणीनां या श्रेणिः पंक्तिस्तस्या या कांतिस्तया यत्सहचरणं तद्विषये निपुणाया फणामणिकिरणधोरणी तया शोणायमानोरक्तीकृतः शिथिलतरः समग्रविग्रहः संपूर्णदेहो यस्यैवंविधः ॥ एतेन बाह्यरक्तत्वं सूचितं ॥ तथा ॥ अत्युग्रः ॥ किंकुर्वन्॥ अहमित्यादिकिलेत्यंतं ॥कृपावर्षणविषये निपुणाय कृष्णाय अहं बहिरिव अंतरंगेऽपि रक्तो रक्तवर्णोऽनुरक्तश्चाऽस्मि इति सूचयन् किलेत्युत्प्रेक्षा ॥ कृपावर्षणनिपुणायेत्यनेन भगवति बाह्याभ्यंतरानुरक्तत्वसूचनसार्थक्यं ध्वनितं ॥ कृष्णायेत्यत्र क्रिययायमभीति संप्रदानत्वं ॥ ३४ ॥

प० ॥ दर्वीकरत्वं च फणींद्रतां ताः कर्तुं स्फुटामं



जलिबंधयुक्ताः ॥ स्तुतिं प्रचक्रुर्हि धवस्य यत्ना
द्विलोमशंकां प्रवहंत्य आरात् ॥ ८६ ॥

दर्वीकरत्वमिति ॥ ताः कालियपत्न्यः हि यस्माद्धवस्य भर्तुः कालियस्य ॥ विलोमशंकां विलोमस्य विपरीतस्य धवस्य वधस्येत्यर्थः शंकां वहंत्यः तत्तस्मात् अंजलिबंधयुक्ताः सत्यः आरात्समीपे यत्नात् स्तुतिमर्थात् श्रीकृष्णस्य प्रचक्रुः ॥ यत्नादित्यनेन भगवत्स्तवस्य दुष्करत्वं ध्वन्यते ॥ अंजलिकरणे स्तुतिकरणे चाऽन्यत्कारणद्वयमुत्प्रेक्षते ॥ दर्वीकरत्वं सर्पत्वं दर्वीसदृशकरत्वंच॥ अंजलिकरणे हि दर्वीसदृशौ करौ भवतः ॥ चपरं फणींद्रतां सर्पश्रेष्ठत्वं अथच उत्कृष्टज्ञानमंतरा भगवत्स्तवनस्याऽशक्यत्वात् गत्यर्थकफणधातोर्ये गत्यर्थास्ते ज्ञानार्था इति ज्ञानवाचकत्वेन तन्निष्पन्नत्वात्फणिशब्दस्य फणींद्रत्वं ज्ञानिश्रेष्ठत्वं यद्वा लक्षणया फणींद्रत्वं शेषसदृशत्वं शेषो यथा वक्ता तथा वयमपि वक्त्र्य इति स्ववक्तृतां स्फुटां स्पष्टां कर्तुमिवेति गम्योत्प्रेक्षा ॥ उपजातिर्वृत्तं ॥ ८६ ॥

ग० ॥ तत्रससकलत्रःसकलत्रत्रस्तपृदाकुपवित्र
कृतपवित्रविचित्रस्तोत्रतुष्टोनेत्रशतपत्रात्कृपांभः
परिवर्षन्भोभोदीर्घपृष्ठपरिवृढगाढगरलगंडूषान
र्हीकृतकालिंदीनीरेणधीरेणत्वयात्रक्षणमात्रमपि
नस्थेयमितितमादिदेश ॥ ३५ ॥

तत्रेति॥तस्मिन्समये सः श्रीकृष्णः इति तं आदिदेश आज्ञप्तवानित्यन्वयः ॥ इतिकिं ॥ भो भो दीर्घपृष्ठपरिवृढ सर्पश्रेष्ठ कालिय ॥

गाढेति॥गाढं यद्गरलं विषं तेन गंडूषानर्हीकृतं गंडूषार्थमप्ययोग्यीकृतं कालिंदीनीरं यमुनोदकं येन तथाविधेन धीरेण त्वया अत्र यमुनाऱ्हदे क्षणमात्रमपि नस्थेयमिति॥कीदृशः श्रीकृष्णः॥सकलत्रः सकलांस्त्रायते रक्षतीति सकलत्रः ॥ तथा॥सकलत्रेति॥कलत्रैर्भार्याभिः सहितः सकलत्रः कलत्रं श्रोणिभार्ययोरित्यमरात् ॥ सचाऽसौ पृदाकूनां सर्पाणां पवि पविना वज्रेण वा लोकान् त्रायतइति पवित्र इंद्रस्तेन कृतं पवित्रं शुद्धं यत् विचित्रं स्तोत्रं तेन तुष्टः ॥ सर्पः पृदाकुर्भुजग इति दर्वीकरो दीर्घपृष्ठ इति चामरः ॥ तथा॥नेत्रेति॥नेत्रकमलात् कृपांभःपरिवर्षन्॥कृपादृष्ट्या विलोकयन्नितियावत् ॥ ३५ ॥

**प० ॥ तार्क्ष्यद्रावयुतं श्रिया च कलितं कांतावृतं स द्रुतं कृष्णः कुंडलिनं जवेन बलिनं मात्सर्यदोषादिव ॥ कालिंदीसरितः सुखेन सहितं पातुं प्रभुर्जीवनं लीलाभिर्निरयापयत् प्रदलितं यस्मात्स्वयं कुंडली ॥ ८७ ॥**

तार्क्ष्येति ॥ प्रभुर्निग्रहानुग्रहसमर्थः सः कृष्णः कर्षतीति कृष्ण इत्यन्वर्थनामा यस्माद्धेतोः स्वयं कुंडली कुंडलवान् अतः लीलाभिः ॥ अनेनाऽऽयासराहित्यं सूचितं ॥ प्रदलितं पराभूतं कुंडलिनं सर्पं कालियं कालिंदीसरितः सकाशात् जवेन वेगेन निरयापयत् निःसारितवान् ॥ कुंडलिनः पराभवपूर्वकनिःसारणे स्वस्य कुंडलित्वमेव मात्सर्यजनकमिति भावः॥ किंकर्तुं ॥ कालिंदीसरितो जीवनमुदकं तस्याः पत्नीत्वेन तज्जीवितं च सुखेन सहितं यथातथा



द्रुतं शीघ्रं पातुं पानविषयं कर्तुं रक्षितुं च ॥ उत्प्रेक्षते ॥ मात्सर्यदोषादिव ॥ मात्सर्ये हेतुगर्भं कालियस्य साधारणं विशेषणत्रयमाह ॥ तार्क्ष्येत्यादि ॥ द्रोर्वृक्षस्याऽयं संबंधी द्रावः बलिप्रदानार्थं संकेतितवृक्षसंबंधी अपराधः तार्क्ष्यस्य गरुडस्य यो द्रावस्तेन युतं युक्तं ॥ इदमर्थाणंतात्स्वार्थिकोऽण् ॥ यद्वा ॥ तार्क्ष्यद्रौ अयुतमितिच्छेदः ॥ तार्क्ष्यस्य यो द्रुः बलिप्रदानवृक्षस्तस्मिन् अयुतं संकेतानुसारेणाऽयुक्तं तत्रानागतमिति यावत् ॥ विभक्तिपरिणामेन कृष्णस्याऽप्येतद्विशेषणं ॥ एवमग्रिमंविशेषणद्वयमपि ॥ तार्क्ष्येण गरुडेन यो द्रावो गतिस्तया युतः॥ तथा ॥ श्रिया विषेण कलितं युक्तं पक्षे श्रीर्लक्ष्मीस्तया युतः ॥ तथा ॥ कांतायुतं स्त्रीयुक्तं पक्षे गोपीभिर्युतः ॥ तथा ॥ बलिनंबलवंतं ॥ उभयत्रापि समं ॥ अथवा कृष्णपक्षे बलरामयुतं ॥ शार्दूलविक्रीडित वृत्तं ॥ ८७॥

**वासःस्त्रङ्मणिभूषणमाल्यसुगंधैस्सुपूजितं तेन ॥ कृष्णं दृष्ट्वा मुमुदे गोगोपीगोपवृंदमथ कूले॥८८॥**

वासइति॥अथ तेन कालियेन वासांसि वस्त्राणि स्रजो मौक्तिकादिमालाः मणिमयानि भूषणानि माल्यानि पुष्पाणि सुगंधद्रव्याणि च तैः सुष्ठु पूजितं कृष्णं कूले यमुनातीरे दृष्ट्वा गोगोपीगोपवृंदं मुमुदे हृष्टमभूत् ॥ यमुनातः कालियं निर्याप्य स ऱ्हदाद्बहिर्निर्गतइत्यर्थः ॥ ८८ ॥

**ग० ॥ तदात्वे तत्संश्लेषात्संमार्जितसकलक्लेशाः किल व्रजेशादयस्तरणितनयतटिनीप्रतीरवनप्रदेशे निशि सुषुपुः॥ ३६॥**

अथाऽग्निपानलक्षणलीलां प्रस्तौति ॥ तदात्वइति ॥ तदात्वे तत्काले ॥ तदिति ॥ कृष्णालिंगनेन निरस्तसमस्तक्लेशाः व्रजेशादयो नंदादयो निशि रात्रौ तरणेः सूर्यस्य तनया चाऽसौ तटिनी नदी यमुना तस्याः तटसंबंधिनि वनप्रदेशे सुषुपुः निद्रांचक्रुः किल॥ ३६ ॥

**प० ॥ मन्मित्रश्वसनाशनप्रणयिनं पन्नगं दमित्वा द्रुतं कृष्णः कंजविलोचनः खलमहो निस्सारयामास तं॥ मत्वा तत्किल पारितोषिकमथो दातुं तदोषर्बुधस्तस्मै काननकुप्रदेशममितं त्वावेष्टयद्यत्नतः॥ ८९॥**

तद्वने अग्निप्रवेशनमुत्प्रेक्षापूर्वकं वर्णयति ॥ मदिति ॥ तदा तु कालियदमनोत्तरकालएव उषर्बुधोऽग्निः॥शोचिष्केश उषर्बुध इत्यग्निपर्यायेष्वमरात्॥अमितं अपरिमितं विशालमिति यावत्॥काननकुप्रदेशं वनसंबंधिभूप्रदेशं यत्नत आवेष्टयत् आसमंताद्वेष्टयतिस्म॥अत्रोत्प्रेक्षते ॥मन्मित्रेत्यादि॥ कंजविलोचनः कमललोचनः कृष्णः॥ मन्मित्रेति ॥ ममाग्नेर्मित्रं यः श्वसनो वायुस्तस्याऽशने भक्षणे प्रणयिनं प्रीतिमंतं खलं तं कालियं पन्नगं दमित्वा द्रुतं निःसारयामास तन्मत्वा अवधार्य अथो इह एतद्विषये तस्मै श्रीकृष्णाय पारितोषिकं संतोषदानं दातुं किल॥शार्दूलविक्रीडितं वृत्तं ॥ ८९ ॥

**ग० ॥ एवं विवर्धमानवन्हिवेगवेष्टितवनावनिविलोकनवेपमानावयवास्सर्वे स्वं क्लेशं केशवाय निवेदयामासुः॥ ३७॥**





एवमिति॥एवं वेष्टनविधया विवर्धमानो विशेषेण वृद्धिं प्राप्तो यो वन्हिरग्निस्तेन वेगेन वेष्टिता या वनावनिर्वनभूमिस्तस्या विलोकनेन वेपमानाः कंपमाना अवयवा येषां ते तथाविधाः सर्वे नंदादयः स्वं स्वकीयं क्लेशं अग्नितापप्रयुक्तं दुःखं केशवाय निवेदयामासुः ॥ ३७ ॥

**प० ॥ मद्वदनं किल सदनं दमुनस इत्यत्र वस्तुमागात्सः॥ इति स विचार्य निदानं तस्मिंस्तस्मै स्थितिं तदा प्रादात्॥ ९०॥**

अथाऽग्निपानमुत्प्रेक्षापूर्वकं वर्णयति ॥ मदिति ॥ तदा निवेदनावसरे सः श्रीकृष्णः मद्वदनं मन्मुखं दमुनसः सप्तार्चिर्दमुनाः शुक्र इत्यग्निपर्यायेष्वमरादग्नेः सदनं निवासस्थानं इति हेतोः सोऽग्निरत्र वस्तुं वासं कर्तुमागात् इति निदानं आगमनकारणं विचार्य किलेत्युत्प्रेक्षा॥ वन्हिर्वाग्भूत्वा मुखं प्राविशदिति मुखादिंद्रश्चाऽग्निश्चेति च श्रुतेः ॥ तस्मिन्वदने तस्मै अग्नये स्थितिं स्थानं प्रादात्॥भक्तप्रार्थनं श्रुत्वा अग्निं पपावित्यर्थः ॥ ९० ॥

**गोसर्गे गोपवर्गेण गोगणैर्गोपतिर्यथा ॥ गोपेशसूनुस्समगाद्गोकुलं गोकुलोत्सवः॥ ९१ ॥**

गोसर्गेइति॥गोसर्गे प्रातःकाले ॥ व्युष्टं विभातं द्वे क्लीबे पुंसि गोसर्ग इष्यते इत्यमरात् ॥ गोपेशसूनुर्नंदतनयः श्रीकृष्णः गोपवर्गेण गोपसमूहेन तथा गोगणैर्धेनुसमुहैः सह ॥ पक्षे गां वाणीं वेदलक्षणां पांति रक्षंतीति गोपाः वालखिल्यादयः परमर्षयस्तद्वर्गेण गोगणैः किरणसमूहैश्च सह गोपतिर्यथा सूर्यइव गोकुलं स्वनि-

वासस्थानं घोषं प्रति समगात् ॥ कीदृशः कृष्णो गोपतिश्च ॥ गोकुलोत्सवः गवां कुलस्योत्सवरूपः ॥ यद्वा गोकुलस्योत्सवो यस्मादिति व्यधिकरणपदो बहुव्रीहिः ॥ पक्षे गोकुलस्य रात्रिसंबंधितमोऽभिभूतस्य लोकानां दृष्टिसमूहस्योत्सवरूपः ॥ स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले ॥ लक्ष्यदृष्ट्या स्त्रियां पुंसि गौरित्यमरः ॥ ३७ ॥

ग० ॥ तदनु क्रमेणाऽसमशरसमरविजयसिद्धि प्रकटीकरणचणपताकिकाभिरिव चंचच्चंचरीकचयचुंबिताग्रभागमंजुमंजरीभिस्स्वाभिख्यामन्वर्थयद्भि स्सहकारतरुभिः कुपथपथिकजनवक्षस्थलविद्रावणविषक्तरक्तपंकपंकिलनखायुधत्वं नृहराविवाऽऽत्मन्यपिसुमनस्सुवृंदवीकाशवशेन प्रदर्शयंतीभिः पलाशपलाशिपरंपराभिर्निरंतरकठिनतरकनककलशोपमकुचयुग्मसामीप्यप्रसंगेन प्रीतिकलहेऽपि कठिनतामनुभवत्कामिनीमानसमधुना मम दर्शनमात्रेणैव मत्कुसुमसममतिशयितकोमलं करिष्यामीत्येवंरूपामहमहमिकां प्रकाशयितुमिव निजकुसुमानि प्रकाश्य विलसंतीभिः शिरीषशाखिश्रेणिभिर्बलिवलीमुखबहलबलावलेपलीलालोलच्छाखावृंदस्थाऽमंदसौरभा



भिवहत्पुष्पोत्करैः कंदुकक्रीडामिव विस्तारयद्भिः कदंबकदंबैर्ऋतुसामंतसमूहशासनातिलकमस्यैवाऽस्तीत्थं सूचयितुमिव प्रफुल्लाभिस्तिलकालिभिरेतत्प्रभृतिपादपलतौषधिगुल्मवल्लरीभिस्स्वकीयगुणगणसंपदमभिवर्द्धयंतीभिः प्रतिदिनं प्रतिवनं सुषमातिरेकं कुर्वन् कोकिलाकीरकारंडवहंसराजहंससारिकापुंस्कोकिलादिमपतत्रिकुलकलकंठोक्तं सुधासमधुरं मधुरं विपुलयंश्च ताभ्यां जनदृष्टिश्रवणाल्हादमुज्जृंभयन् सामोदसुखदसरलसमीरतरलाविरलकुंदजात्यादिप्रसवधवलमुकुलविकचकुसुमकांतिव्याजेन प्रतिक्षणं प्रहसन्निव वसंतः सर्वसुखकृतप्रवेशो शौरिशयद्वयाऽऽश्लेषसुभगे व्रजदेशे तनयसमृद्धिवृद्धिप्रसिद्धिकरणायेव तूर्णं कृष्णकर्णाभ्यर्णं समभ्यगात्॥ ३८॥

अथ क्रमप्राप्तं वसंतप्रादुर्भावं वर्णयति ॥ तदन्वित्यादिना गद्येन ॥ तदनु तदनंतरं क्रमेण वसंतः ॥ शौरीति॥शौरेः श्रीकृष्णस्य यः शयद्वयेन हस्तद्वयेन कृत्वा आश्लेष आलिंगनं तेन सुभगे ॥ शौरिणा स्वबाहुबलेन रक्षिते इत्यर्थः ॥ रक्षणसामर्थ्यबोधनतात्पर्यकं शौरिपदं॥शयद्वयाऽऽश्लेषकथनेनैतद्देशस्य भगवत्प्रेमास्पदत्वं बोधितं अतएव॥सर्वेति॥सर्वैः सुखैः कृतः प्रवेशो यस्मिन् तथाविधे व्रजदेशे तनयस्य श्रीकृष्णतनयस्य कामस्य या समृद्धिरैश्वर्यं तस्य या

वृद्धिस्तस्याः प्रकर्षेण या सिद्धिः प्रख्यातिर्वा तत्करणायेव तत्करणं सूचयितुमिवेत्युत्प्रेक्षा॥तूर्णं शीघ्रं ॥ कृष्णेति॥श्रीकृष्णकर्णसमीपदेशं प्रति समभ्यगादिति योजना ॥ कीदृशो वसंतः॥ असमशरेत्यारभ्य सुषमातिरेकं कुर्वन् इत्यंतमेकं विशेषणं ॥ असमशरस्य कामस्य या विजयसिद्धिस्तत्प्रकटीकरणेन वित्ताः प्रकटीकरणचणाः प्रकटीकरणनिपुणा इतियावत् ॥ एवंविधा याः पताकिकास्ताभिरिवेत्युत्प्रेक्षा ॥ चंचदिति ॥ चंचन् प्रकाशमानो यश्चंचरीकचयो भ्रमरसमूहस्तेन चुंबिता अग्रभागा यासामेवंविधाभिर्मंजुमंजरीभिः कृता स्वाभिख्यां सहकारइत्येवं रूपं स्वं नाम अन्वर्थयद्भिरन्वर्थं कुर्वद्भिः सहकारतरुभिः आम्रवृक्षैः ॥ स्वमंजरीमिषेण कामस्य विजयपताकाविस्फारणात्कामसहकारिभिरिति फलितं ॥ तथा नृहराविव नृसिंहइव आत्मन्यपि स्वस्मिन्नपि सुमनसां पुष्पाणां यत्सुवृंदं तस्ययो वीकाशो विकासस्तद्व्रशेन ॥ पक्षे सुमनसोदेवाः ॥ वीकाशोहर्षः -॥ कुपथेति ॥ कुपथे पृथ्वीमार्गे पथिका अध्वगा ये जनास्तेषां प्रायेण विरहिणां वक्षःस्थलस्य यद्विद्रावणं विपाटनं तेन विषक्तो लग्नो यो रक्तपंकस्तेन पंकिलाः पंकविशिष्टा ये नखास्तएव आयुधानि यस्य तस्य भावस्तत्त्वं ॥ पक्षे कुमार्गपथिकः कुत्सितमार्गे पथिको जनो हिरण्यकशिपुः ॥ शेषं पूर्ववत् ॥ प्रदर्शयंतीभिः प्रकटयंतीभिरिवेति लुप्तोत्प्रेक्षा ॥ पलाशपुष्पाणि व्याघ्रनखाकृतीनि रक्तवर्णानि च भवंतीति प्रसिद्धं ॥ पलाशेति ॥ पलाशवृक्षपरंपराभिः ॥ पलाशी द्रुद्रुमागमा इति वृक्षपर्यायेष्वमरः ॥ वसंते पलाशकुसुमसमृद्धिं दृष्ट्वा विरहिणां हृदयानि व्याकुलानि भवंति



तथा॥ निरंतरेत्यादि ॥ निरंतरमाविच्छिन्नं यत् कठिनतरस्याऽतिशयितकठिनस्य कनककलशोपमस्य स्वर्णघटसदृशस्य कुचयुग्मस्य सामीप्यं सान्निध्यं तत्प्रसंगेन प्रीतिकलहेऽपि कठिनतांकाठिन्यमनुभवत् एवंविधं कामिनीनां मानसं अधुनाऽस्मिन्वसंतसमये मम दर्शनमात्रेणैव मत्कुसुमसमं मदीयपुष्पसदृशं अतिशयितकोमलं करिष्यामि इत्येवंरूपां अहमहमिकां परस्पराहंकारं ॥ अनेनोद्दीपकानामन्येषामपि पदार्थानां सत्ता सूचिता॥तामंतरेण परस्पराहंकारस्याऽसंभवात्॥प्रकाशयितुमिव प्रकटयितुमिव निजकुसुमानि स्वकीयपुष्पाणि प्रकाश्य विलसंतीभिः शोभमानाभिः शिरीषशाखिश्रेणिभिः शिरीषवृक्षपरंपराभिः॥शिरीषाणां पुष्पाण्यतिमृदुलानि भवंति॥अनेन विशेषणेन मानवतीनां मानविगमो वसंतप्रादुर्भावे सति स्वयमेव भवतीति सूचितं॥तथा॥बलीति॥बलिनो येवालिमुखा वानरास्तेषां बहलबलावलेपेन अतिशयितबलगर्वेण या लीला तया लोलंत्यश्चंचलीभवंत्यो याः शाखास्तासां यद्वृंदं तत्स्थानि अमंदसौरभमतिशयितसौगंध्यमभिवहंतीत्येवंविधानि च यानि पुष्पाणि तेषां ये उत्कराः समूहास्तैः कंदुकक्रीडां विस्तारयद्भिरिव कदंबकदंबैः कदंबवृक्षसमूहैः॥ कदंबकुसुमानि हि कंदुकसदृशानि भवंति ॥ कंदुकक्रीडायामितस्ततस्तच्चालनवद्वानरकृतशाखाकंपनात्पुष्पाणामपि चालनं बोध्यं ॥ तथा॥ऋतुसामंतेति ॥ ऋतुसामंतानां ऋतुरूपाणां मांडलिकानां यः समूहस्तच्छासनतिलकं अस्यैव वसंतस्यैवाऽस्ति अनेन एतत्कार्यविषये अस्यैव तिलकमस्तीति लोकोक्तिरनुसृता ॥ ऋतूनांकुसुमाकर इत्यनेन भगवता स्वयमेव वसंतस्य स्वविभूतित्वकथनात् युक्तं तस्यर्तुराजत्वं ॥ इत्थं सूच

यितुमिव ऋतुचक्रवर्ती अयमेवेति सूचयितुमिवेत्यर्थः ॥ प्रफुल्ला-भिः पुष्पाणां विकसितत्वेन विकसिताभिः तिलकवृक्षपरंपराभिः॥ अतएव विकसितपुष्पबाहुल्ये फुल्लोऽयं वृक्ष इति लोकावदंति॥त-था॥एतदिति॥ एतत्प्रभृतयः पूर्वोक्तसहकारादयो ये पादपा महांतो वृक्षा लता वीरुधः ओषधयः फलपाकांताः गुल्मा रम्यतृणादिस्तं-बाः वल्लर्यस्तुलस्यादिमंजर्यस्ताभिः॥कीदृशीभिः स्वसंबंधिच्छाया-सौगंध्यप्रभृतिगुणगणानां संपदमैश्वर्यं अभिवर्द्धयंतीभिः ॥ प्रति-दिनं दिने दिने प्रतिवनं वनेवने सुषमातिरेकं परमशोभातिशयं कु-र्वन् ॥ तथा॥कोकिलेत्यादिविपुलयन्नित्यंतं द्वितीयं विशेषणं॥ सु-धासमधुरं सुधासदृशधूर्वहं सुधातुल्यमिति यावत् मधुरं कोकि-लाकीरकारंडवहंसराजहंससारिकापुंस्कोकिलादिमा ये पतत्रिणः पक्षिणस्तेषां कुलस्य कलोऽव्यक्तोयः कंठोक्तः शब्दस्तं विपुलयन् लोहितचंचुचरणा राजहंसा हंसावांतरभेदाः ॥ कोकिलाशब्देन स्त्रीव्यक्तिः॥ पुंस्कोकिलाः पुमांसः कोकिलाः ॥ तथा ॥ ताभ्यां पूर्वोक्तसुषमातिरेकोक्तपक्षिगणमधुरशब्दाभ्यां ॥ जनेत्यादि ॥ सु-षमातिरेकेण दृष्टीनामुक्तपक्षिगणमधुरशब्देन श्रवणानां चानंदं व-र्द्धयन्नित्यर्थः ॥ चपरं ॥ सामोदेत्यादि ॥ सामोदः सुगंधयुक्तः सु-खदः सरलोऽप्रतिबंधश्च यस्समीरस्तेन तरलाश्चंचला आविरला घना ये कुंदजात्यादयस्तेभ्यः प्रसव उत्पत्तिर्येषामेवंविधा धवलाः शुभ्रा ये मुकुलाः विकचानि विकसितानि यानि कुसुमानि च तेषां या कांतिस्तद्व्याजेन तन्मिषेण प्रतिक्षणं प्रहसन्निव स्थितः॥ ॥३८॥

प० ॥ कुसुमाकरं किल समीक्ष्य सत्वरं व्रजमागतं स्वभुजपालितं वरं॥ हरिरभ्यनंददथ पुत्रविक्रमो हृदि माधवे समुचितः शुभान्वये॥ ९२॥



कुसुमाकरमिति ॥ अथ हरिः स्वभुजपालितं वरं श्रेष्ठं व्रजं प्रत्या-गतं कुसुमाकरं वसंतं अथच कुसुमानां पुष्पाणां कामबाणभूता-नामाकरः खनिस्तं समीक्ष्य सत्वरं हृदि अभ्यनंदत् ॥ अभिनंदने कारणमाह ॥ पुत्रेति ॥ शुभान्वये शुभः अन्वय आगमनं यस्य स शुभान्वयस्तस्मिन् माधवे वसंते पुत्रविक्रमः पुत्रस्य कामस्य विक्रमः समुचितः ॥ अथच मधोर्यादवभेदस्याऽयं माधवस्तस्मिन् शुभान्वये शुभवंशे पुत्रविक्रमः समुचितः उत्तमवंश्यानां पुत्राणां पराक्रम उचित एव ॥ इतीति शेषः॥इतिहेतोरित्यर्थः ॥ मंजुभाषिणी वृत्तं॥ सजसा जगौ भवति मंजुभाषिणीति तल्लक्षणात् ॥ ९२ ॥

तत्सामयिकविहारैर्हास्यरसोद्दर्द्धकैश्च सुखदैरसः॥ गोपीभिर्गोपगणैररंस्त तैर्गोकुले सरित्तीरे॥९३॥

## ॥इति श्रीबालकृष्णचंपूप्रबंधे द्वितीयः स्तबकः॥ ॥समाप्तः॥

तत्सामयिकेति ॥ सः श्रीकृष्णः ॥ वसंतसमयसंबंधिविहारैः ॥ तै-रिति प्रसिद्धार्थकं विहाराणां गोपगणानां वा विशेषणं ॥ भगव-तो वसंतक्रीडायां विचित्रा वेषास्तथा तथा भाषणानि च हास्य-रसवर्द्धकतया बोध्यानि ॥ अद्याऽपि वसंते वेषादिकरणं तद्देशे प्रसिद्धतरं ॥ शेषं सुगमं ॥ ९३ ॥

इति श्रीबालकृष्णचंपूव्याख्याने द्वितीयः स्तबकः समाप्तः॥२॥